॥ श्रीदुर्गासप्तशती ॥

प्रकाशक—
श्रीमहेशचन्द्र भट्टाचार्य एण्ड को०
८४ नं० क्लाइव स्ट्रीट,
कलकत्ता।

प्रथम संस्करण] १९३७ [मूल्य १)

प्रकाशक—
श्रीफकीरदास सरकार
इकानमिक फार्मेसी
८४, क्लाइव स्ट्रीट, कलकत्ता।




मुद्रक—
श्रीशैलेन्द्रचन्द्र भट्टाचार्य
इकानमिक प्रेस
२५, रायबागान स्ट्रीट, कलकत्ता।

1000—12-7-37.

॥ श्रीगणेशाय नमः ॥

॥ श्री दुर्गासप्तशती ॥



॥ अथ पाठक्रमः ॥

साधकः कृतप्रातर्नित्यकृत्यः प्राङ्मुख आचामेत् ॥

आचमनम् ॥

ॐ ऐं आत्मतत्त्वं संशोधयामि नमः स्वाहा ।

ॐ ह्रीं विद्यातत्त्वं संशोधयामि नमः स्वाहा ॥

ॐ क्लीं शिवतत्त्वं संशोधयामि नमः स्वाहा ॥

इति तत्त्वत्रयेणाचम्य पवित्रपाणिः प्राणानायम्य मूलेन वामनासया वायुमापूर्य कुम्भकेन चतुर्वारं मूलं पठित्वा वारद्वयं मूलमुच्चरन् दक्षनासया तं रेचयेत् ॥ ततो गणाधिपादीन्नत्वा संकल्पं कुर्यात् ॥

॥ संकल्पः ॥

देशकालौ संकीर्त्य अस्माकं सर्वेषां० समस्तमंगलावाप्त्यर्थं अमुकगोत्रस्यामुकनाम्नो मम अमुककामनासिद्ध्ये

महाकाली महालक्ष्मी महासरस्वतीस्वरूपिणी त्रिगुणात्मिका-
महालक्ष्मीप्रीत्यर्थं कवचार्गलाकीलकैकादशन्यासपूर्वकनवार्णमं-
त्राष्टोत्तरशतजपरात्रिसूक्तपाठपूर्वकं देवीसूक्तपठननवार्णमंत्रा-
ष्टोत्तरशतजपरहस्यत्रयपठनांतं श्रीचंडीसप्तशत्याः पाठमहं
करिष्ये ॥ तदंगत्वेनादौ संक्षेपत आसनविधिभूशुद्धिभूत-
शुद्ध्यादि कर्म दीपस्थापनपूजने सप्तशतीपुस्तकपूजनं
रहस्योक्तयंत्रस्थप्रधानदेवतापूजनं वा तंत्रोक्तनवार्णयंत्रस्थ-
प्रधानदेवतापूजनं पूजांगबलिदानं सकलशापप्रतिरोधिनि-
वृत्तये शापोद्धारमंत्रस्य सप्तसंख्याकजपं पाठादौ पाठान्ते चैक-
विंशतिसंख्याकतंत्रोक्तोत्कीलनमंत्रजपं च करिष्ये ॥ आदौ
निर्विघ्नतासिद्ध्यर्थं महागणपतिस्मरणं पूजनं वा करिष्ये ॥
गणा० स्मरणे पूजने वा विनियोगः ॥

ॐ गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद
सादनं इति ॥ तथा गुरुं च ॥ नमो गुरुभ्यो गुरुपादुका-
भ्यो नमः परेभ्यः परपादुकाभ्यः । आचार्यसिद्धेश्वर-

पादुकाभ्यो नमोस्तु लक्ष्मीपतिपादुकाभ्यः ॥ इति गणपतिं गुरुं च प्रणमेत् ॥

॥ आसनविधिः ॥

कल्पितासनाधों जलादिना त्रिकोणं विलिख्य—ॐ ह्रीं आधारशक्तिकमलासनाय नमः इत्याधारशक्तिं संपूज्य तदुपर्यनुद्विग्नताकरमजिनोर्णाद्यासनमास्तीर्य पृथ्वीति मंत्रस्य मेरुपृष्ठऋषिः कूर्मो देवता सुतलं छंदः आसने विनियोगः । ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं च धारय मां देवी पवित्रं कुरुचासनम् ॥ इति मंत्रेण आधारशक्तिं संप्रार्थ्य ॐ भूर्भुवः स्वरित्यासनं संप्रोक्ष्य तस्मिन्नासने प्राङ्मुख उदङ्मुखो वोपविशेत् ॥

॥ गुरुप्रणामः ॥

ततः स्ववामे गुरुभ्यो नमः । दक्षिणे भद्रकाल्यै नमः । उपरि गणपतये नमः ॥ इति द्वारदेवताः संपूज्य मूलं पठन् दिव्यदृष्ट्यवलोकनेन दिव्यान् विघ्नानुत्सार्य ॐ फडिति मंत्रेण प्रोक्षणेनांतरिक्षस्थान् विघ्नानुत्सार्य तेनैव मंत्रेण भूमौ वामपादपार्ष्णिघातेन भौमान् विघ्नानुत्सार्य अस्त्राय फडिति तालत्रयेण दिग्बंधनं कृत्वा ॐ नमः सुदर्शनायास्त्राय

फडिति मंत्रेण छोटिकया वह्निप्राकारत्रयं विभाव्य मूलेनाचम्य प्राणायामं कुर्यात् ॥

॥ अथ भूशुद्धिः ॥

ॐ हुमिति बीजेन कुंडलिनीमुत्थाप्य हृदयस्थं दीपकलिकाकारं जीवं ॐ हं सः इति मंत्रेण ब्रह्मणि संयोज्य वामकुक्षिस्थितं पापपुरुषमसद्वासनात्मकं ध्यात्वा यमिति वायुबीजेन ३२ द्वात्रिंशद्वारमावर्तितेन संशोष्य रमित्यग्निबीजेन ६४ चतुःषष्टिवारमावर्तितेन तं दग्ध्वा भूयो यमिति वायुबीजेन १६ षोडशमात्रया तद्भस्म रेचयित्वा वमित्यमृतबीजेन प्राणायामं कुर्यात् ॥ इति भूशुद्धिः ॥

॥ अथ भूतशुद्धिः ॥

इडया वायुमापूर्य कुंभके हं यं रं लं वं इति पंच भूतबीजानि सकृदावर्त्य पिंगलया रेचयेत् ॥ ततो वमित्यमृतबीजेन प्राणायामं कृत्वा सद्वासनात्मकं देवीशरीरमुत्पाद्य सोहं इति मंत्रेण कुंडलिनीं ब्रह्मणोवहृत्य तत्रस्थं जीवं हृदि निधाय कुंडलिनीं मूलाधारगतां विभावयेत् ॥

॥ अथ प्राणप्रतिष्ठा ॥

आं ह्रीं क्रौं मम प्राणा इह प्राणाः ।
आं ह्रीं क्रौं मम जीव इह स्थितः ।
आं ह्रीं क्रौं मम सर्वेन्द्रियाणीह स्थितानि ।

आं ह्रीं क्रौं मम वाङ्मनस्त्वक्चक्षुः श्रोत्रजिह्वाघ्राणप्राणाः इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥

ॐ असुनीते पुनरस्मासु चक्षुपुनः प्राणमिह नो धेहि भोगं । ज्योक्पःश्येम सूर्यमुच्चरंतमनुमते मृड़यानः स्वस्ति ॥ गर्भाधानादिपंचदशसंस्कारसिद्ध्यर्थं पंचदशप्रणवावृत्तीः करिष्ये इति ॐकारं १५ वारं जपेत् । रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढ़ाकराब्जैः पाशं कोदंडमिक्षूद्भवमथ गुणमप्यंकुशं पंचबाणान् । बिभ्राणास्रक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परानः ॥ सुप्रतिष्ठितमस्तु ॥ इति प्राणप्रतिष्ठा ॥

॥ अथ मातृकान्यासः ॥

ॐ अं नमः ललाटे ॥ आं नमः मुखवृत्ते ॥
ॐ इं नमः दक्षनेत्रे ॥ ईं नमः वामनेत्रे ॥

ॐ उं नमः दक्षकर्णे ॥ ऊं नमः वामकर्णे ॥
ॐ ऋं नमः दक्षनसि ॥ ॠं नमः वामनसि ॥
ॐ ऌं नमः दक्षगंडे ॥ ॡं नमः वामगंडे ॥
ॐ एं नमः ऊर्ध्वोष्ठे ॥ ऐं नमः अधरोष्ठे ॥
ॐ ओं नमः ऊर्ध्वदंतपंक्तौ ॥ औं नमः अधोदंतपंक्तौ ॥
ॐ अं नमः शिरसि ॥ अः नमः मुखै ॥
ॐ कं नमः दक्षबाहुमूले ॥ खं नमः दक्षकूर्परे ॥
ॐ गं नमः दक्षिण मणिबंधे ॥ घं नमः दक्षांगुलिमूले ॥
ॐ ङं नमः दक्षांगुल्यग्रे ॥ चं नमः वामबाहुमूले ॥
ॐ छं नमः वामकूर्परे ॥ जं नमः वाममणिबंधे ॥
ॐ झं नमः वामांगुलिमूले ॥ ञं नमः वामांगुल्यग्रे ॥
ॐ टं नमः दक्षपादमूले ॥ ठं नमः दक्षजानुनि ॥
ॐ डं नमः दक्षगुल्फे ॥ ढं नमः दक्षपादांगुलिमूले ॥
ॐ णं नमः दक्षपादांगुल्यग्रे ॥ तं नमः वामपादमूले ॥
ॐ थं नमः वामजानुनि ॥ दं नमः वामगुल्फे ॥
ॐ धं नमः वामांगुलिमूले ॥ नं नमः वामांगुल्यग्रै ॥
ॐ पं नमः दक्षपार्श्वे ॥ फं नमः वामपार्श्वे ॥
ॐ बं नमः पृष्ठे ॥ भं नमः नाभौ ॥

ॐ मं नमः जठरे ॥ यं नमः हृदि ॥
ॐ रं नमः दक्षांसे ॥ लं नमः ककुदि ॥
ॐ वं नमः वामांसे ॥ शं नमः हृदयादिदक्षहस्तांतम् ॥
ॐ षं नमः हृदयादिवामहस्तांतम् ॥ सं नमः हृदयादिदक्ष-
पादांतम् ॥ ॐ हं नमः हृदयादि वामपादान्तम् ॥
ॐ ड़ं नमः जठरे ॥ क्षं नमः मुखे ॥ प्रणवादिः
सर्वत्रेति तत्त्वमुद्रया मातृकान्यासं कुर्यात् ॥

॥ अथ दीपप्रतिष्ठा ॥

मूलेनाचाम्य प्राणानायम्य कर्मसाक्षित्वेन दीपस्थापनं कुर्यात् ॥ तत्र दीपाधारयंत्रं त्रिकोणं गंधेन देवीदांक्षणतो लिखित्वा दीपाधारयंत्राय नमः ॥ इति मंत्रेण संपूज्य तदु-परि दीपं संस्थाप्य गन्धादिना दीपं संपूज्य प्रार्थयेत् ॥ भो दीप देवीरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत् ॥ यावत्कर्म-समाप्तिः स्यात्तावत्त्वं सुस्थिरो भव ॥ इति दीपं संप्रार्थ्य तथैव वामेऽपि तैलदीपं प्रज्वालयेत् ॥

॥ अथ यंत्र-पूजा ॥

तत्र स्फटिकहेमताम्राद्यन्यतमपत्रे पात्रे वा यथाशक्ति गन्धाष्टकेन रक्तचन्दनेन वा नवकोष्ठं यंत्रं लिखित्वा—

प्रथम पंक्तावीशानकोणादग्निकोणपर्यंतं गौरीरुद्रौ सरस्वती-विरिंची लक्ष्मीविष्णू इति क्रमेण स्थाप्य मध्यपंक्तावुत्तरतः दक्षिणांतं महाकाली महालक्ष्मी महासरस्वत्यः तथा तृतीय-पंक्तौ वायुकोणतो निर्ऋतिकोणपर्यंतं क्रमेण दशाननाष्टादश-भुजाऽष्टभुजाः स्थापयेत् । अत्र तृतीयपंक्तिमध्यकोष्ठस्थायाः अष्टादशभुजायाः दक्षे सिंहं वामे महिषं च स्थापयेत् ॥ ततः पूर्वोक्तप्राणप्रतिष्ठामंत्रेण यंत्रस्य प्राणप्रतिष्ठां कृत्वा-ऽऽवाहनादिषोडशोपचारैः संपूज्य मूलभूतां तुरीयां महालक्ष्मीं विश्वेश्वरीं जगद्धात्रीं० इत्यादिभिश्चरित्रत्रयोक्तैः स्तोत्रैः स्तुवीत ॥

॥ अथ पूजाविधिः ॥

अस्य श्रीनवार्णमंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः गाय-त्र्युष्णिगनुष्टुभश्छन्दांसि श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः नन्दाशाकंभरीभीमाः शक्तयः रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि अग्निवायुसूर्यास्तत्त्वानि श्रीजगदम्बाप्रीत्यर्थे न्यासे पूजायां च विनियोगः ॥ ऋष्यादिन्यासान् मूलषडंगन्या-सांश्च विधाय कलशशंखघंटादि संपूज्य ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत् पुंडरीकाक्षं स

वाह्याभ्यन्तरः शुचिः ॥ मूलेनात्मानं पूजाद्रव्यानि प्रोक्षेत् ॥ यंत्रं संस्पृश्य ॐ आं सोहं इति त्रिवारोच्चारितमंत्रेण यंत्रस्य प्राणप्रतिष्ठां कृत्वा ततः त्रिखण्डामुद्राया पुष्पमादाय स्वहृदिस्थां त्रिगुणां देवीं सुषुम्णामार्गेण ब्रह्मरन्ध्रद्वारा कुसुमे समागतां विभाव्य तत्र रूपत्रयं बिभ्राणां ध्यायेत् ॥

॥ अथ ध्यानम् ॥

खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः
शंखं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ॥
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुंकैटभम् ॥ १ ॥
अक्षस्रक्परशुं गदेषु कुलिशं पद्मं धनुः कुण्डिकां
दंडं शक्तिमसिं च चर्म जलजं घंटां सुराभाजनम् ॥
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननां
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥ २ ॥
घण्टाशूलहलानि शंखमुसले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम् ॥
गौरीदेहसमुद्भवां त्रिनयनामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि दैत्यार्दिनीम् ॥ ३ ॥

तत्पुष्पं यंत्रे संस्थाप्य तत्र मध्यबीजत्रये महालक्ष्म्यादि-देवतात्रयं संस्थितं विभावयेत्। तत आवाहनी—स्थापनी-संनिधापिनी-संनिरोधिनी-धेनु-योनिमुद्रामूलेन प्रदर्श्य मूल-मुच्चार्य श्रीमहाकाली महालक्ष्मीमहासरस्वत्यै नमः आवाह-यामि ॥

एवं मूलेनासनपाद्यार्घ्याचमनीयस्नानमंगलस्नानमधुपर्क-पंचामृतपूजां विधाय श्रीएकपुरुष सूक्तादिभिरभिषिंच्य मूलेन वस्त्रोपवस्त्रोत्तरीयकंचुकीयज्ञोपवीतचन्दनालंकारहरिद्रा-कुंकुमकज्जलसिन्दूरपरिमलद्रव्यकङ्कणकण्ठसूत्रादिसौभाग्यालं-कारपुष्पाणि मूलेन श्रीमहाकालीमहालक्ष्मी महासरस्वत्यै नमः अमुकद्रव्यं समर्पयामीति प्रत्युपचारमुच्चार्य मंत्रपुष्पांत-पूजां कृत्वा आवरणदेवता आवाह्य संपूजयेत्। अत्र सर्वत्रापि यथाक्रमं प्रागादिशो ग्राह्याः। इन्द्रादिलोकपाला-द्यावाहनविषये तु प्रागादिक्रम एवेति ज्ञेयम्। तत्र यंत्र-षट्कोणस्थपूर्वकोणे सरस्वतीब्रह्मभ्यां नमः सरस्वती ब्रह्मणा-वाहयामीत्येवं सर्वत्रावाहने वाच्यम् १ एवमीशान-कोणे गौरीरुद्राभ्यां नमः। २ आग्नेयकोणे लक्ष्मी-हृषीकेशाभ्यां नमः ३ पश्चिमकोणे अष्टादशभुजायै नमः ४

वायव्कोणे दशाननायै नमः ५ नैर्ऋत्यकोणे अष्टभुजायै नमः ६ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥ अनेन प्रथमावरणार्चनेन भगवती श्रीमहाकाली महालक्ष्मी महासरस्वती प्रीयंताम्॥ १॥ पुनः षट्कोणेषु प्रागादिदिक्षु॥

१। ॐ नं नंदजायै नमः। २। ॐ रं रक्तदंतिकायै नमः।
३। ॐ शां शाकंभर्यै नमः। ४। ॐ दुं दुर्गायै नमः।
५। ॐ भीं भीमायै नमः। ६। ॐ भ्रां भ्रामर्यै नमः।
दयाब्धे त्राहि संसारसर्पान्मां शरणागतम्॥ २॥

षट्कोणाद्बहिराग्नेय्यादिचतुर्भागेषु—

१। ॐ जं जयायै नमः। २। ॐ विं विजयायै नमः।
३। ॐ जं जयंत्यै नमः। ४। ॐ अं अपराजितायै नमः।
५। षट्कोणपार्श्वयोर्दक्षिणभागे ॐ सिंहाय नमः।
६। उत्तरभागे ॐ महिषाय नमः दयाब्धे०॥
तृतीयावरणार्चनम्॥ अनेन तृ०॥ ३॥
अष्टदलेषु प्रागादिषु १। ॐ ब्रां ब्राह्म्यै नमः।
२। ॐ मां माहेश्वर्यै नमः। ३। ॐ कौं कौमार्यै नमः।
४। ॐ वैं वैष्णव्यै नमः। ५। ॐ वां वाराह्यै नमः।

६। ॐ नां नारसिंह्यै नमः। ७। ॐ ऐं ऐंद्र्यै नमः।
८। ॐ चां चामुंडायै नमः। दयाब्धे त्राहि संसार०
चतुर्थावरणार्चनम्॥ अनेन०॥ ४॥

पुनरष्टदलेषु प्रागादिषु १। ॐ अं असितांगभैरवाय नमः।
२। ॐ रुं रुरुभैरवाय नमः। ३। ॐ चं चंडभैरवाय नमः।
४। ॐ क्रों क्रोधभैरवाय नमः। ५। ॐ उं उन्मत्तभैरवाय नमः।
६। ॐ कं कपालभैरवाय नमः। ७। ॐ भीं भीषणभैरवाय०।
८। ॐ सं संहारभैरवाय नमः। दयाब्धे त्राहि संसार०
पंचमावरणार्चनम्॥ अनेन०॥ ५॥

केसरेषु प्रागादिक्रमेण १। ॐ विष्णुमायायै नमः।
२। ॐ चैतनायै नमः। ३। ॐ बुद्ध्यै नमः।
४। ॐ निद्रायै नमः। ५। ॐ क्षुधायै नमः।
६। ॐ छायायै नमः। ७। ॐ शक्त्यै नमः।
८। ॐ तृष्णायै नमः। ९। ॐ क्षांत्यै नमः।
१०। ॐ जात्यै नमः। ११। ॐ लज्जायै नमः।
१२। ॐ शांत्यै नमः। १३। ॐ श्रद्धायै नमः।
१४। ॐ कांत्यै नमः। १५। ॐ लक्ष्म्यै नमः।
१६। ॐ धृत्यै नमः। १७। ॐ वृत्यै नमः।

१८। ॐ स्मृत्यै नमः। १९। ॐ दयायै नमः।
२०। ॐ तुष्ट्यै नमः। २१। ॐ पुष्ट्यै नमः।
२२। ॐ मात्रे नमः। २३। ॐ भ्रांत्यै नमः॥
दयाब्धे त्राहि० षष्ठावरणार्चनम्॥ अनेन०॥ ६॥

प्रागादिषु लोकपालान्। १। ॐ लं इंद्राय नमः।
२। ॐ रं अग्नये नमः। ३। ॐ मं यमाय नमः।
४। ॐ क्षं निर्ऋतये नमः। ५। ॐ वं वरुणाय नमः।
६। ॐ यं वायवे नमः। ७। ॐ सं सोमाय नमः।
८। ॐ हं रुद्राय नमः ईशानीप्रागंतराले ९। ॐ आं ब्रह्मणे०
१०। वरुण निर्ऋत्यंतराले ह्रीं शेषाय नमः०।
दयाब्धे० सप्तमावरणार्चनम्॥ अनेन०॥ ७॥

पुनस्तेनैव क्रमेण १। ॐ वं वज्राय नमः २। ॐ शं शक्त्यै नमः।
३। ॐ दं दंडाय नमः। ४। ॐ खं खड्गाय नमः।
५। ॐ पां पाशाय नमः। ६। ॐ अं अंकुशाय नमः।
७। ॐ गं गदायै नमः। ८। ॐ त्रिं त्रिशूलाय नमः।
९। ॐ पं पद्माय नमः। १०। ॐ चं चक्राय नमः।
दयाब्धे० अष्टमावरणार्चनम्॥ अनेन०॥ ८॥

भूगृहाद्बहिः प्रागादिदिक्षु १। ॐ गं गणपतये नमः २। ॐ अँ क्षें क्षेत्रपालाय नमः ३। ॐ बं बटुकाय नमः ४। ॐ यों योगिनीभ्यो नमः॥ दयाब्धे० नवमावरणार्चनम्॥ अनेन०॥ ९॥

ॐ आवरण देवताभ्यो नमः चन्दनं० इत्यादिपं चोपचार पूजा॥ ततः मूलमुच्चार्य श्रीमहाकाली महालक्ष्मी महासरस्वती ३ धूपं दीपं नैवेद्यं तांबूलं दक्षिणां फलानि महानीराजनदीपं कर्पूरदीपं नमस्कारान् प्रदक्षिणाः मंत्रपुष्पं०॥

॥ अथ क्षमाऽपराधम्॥

अपराधसहस्राणि क्रियंतेऽहर्निशं मया।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि॥ १॥
आवाहनं न जानामि न जानामि विसर्जनम्।
पूजां चैव न जानामि क्षम्यतां परमेश्वरि॥ २॥
मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे॥ ३॥
अपराधशतं कृत्वा जगदंबेति चोच्चरेत्।
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः॥ ४॥

सापराधोस्मि शरणं प्राप्तस्त्वा जगदम्बिके ।
इदानीमनुकंप्योऽहं यथेच्छसि तथा कुरु ॥ ५ ॥
अज्ञानाद्विस्मृतेर्भ्रांत्या यन्न्यूनमधिकं कृतम् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥ ६ ॥
कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे ।
गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥ ७ ॥
गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात् सुरेश्वरि ॥ ८ ॥

इति प्रार्थना ॥

गीतवाद्यनृत्यछत्रचामरांदोलनदर्पणादिसर्वराजोपचारार्थेअ-क्षतान्० ॥ नमस्करोमि ॥ अनेन यथाशक्त्यर्चनेन भग-वती श्रीजगदम्बा प्रीयताम् ॥ शाक्तेभ्यो नमः सर्वोपचारार्थे गन्धाक्ष० ॥

अथ कुमारीपूजा ॥

यजमानः पूजयेच्च कन्यानां नवकं शुभम् ।
द्विवर्षाद्या दशाब्दांताः कुमारीः परिपूजयेत् ॥ १ ॥
अर्थादेकहायन्यः अल्पवयस्का वर्ज्याः ॥ ता आसने उपवेश्यावाहयेन्मंत्रेण ॥

मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥ १ ॥

अनेनैव मंत्रेण नवापि आवाहयेत् । अशक्तौ यथा-शक्ति एकामपि ॥

॥ अथ नवानां पूजामंत्रः ॥

द्विहायनी कूमारीसंज्ञका, तत्पूजामंत्रः—

सर्वस्वरूपे सर्वेशे शर्वशक्तिस्वरूपिणि ।
पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥ २ ॥

त्रिहायनी त्रिमूर्तिः, तन्मंत्रः—

त्रिपुरां त्रिपुराधारां त्रिवर्षां ज्ञानरूपिणीम् ।
त्रैलोक्यवंदितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥ ३ ॥

चतुर्वर्षा कल्याणी, तत्पूजामंत्रः—

कलात्मिकां कलातीतां कारुण्यहृदयां शिवाम् ।
कल्याणजननीं देवीं कल्याणीं पूजयाम्यहम् ॥ ४ ॥

पञ्चवर्षा रोहिणी, तत्पूजामंत्रः—

अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम् ।
अनंतशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् ॥ ५ ॥

षड्वर्षा कालिका, तत्पूजामंत्रः—

कामचारां शुभां कांतां कालचक्रस्वरूपिणीम् ।
कामदां करुणोदारां कालिकां पूजयाम्यहम् ॥ ६ ॥

सप्तवर्षा चण्डिका, तत्पूजामंत्रः—

चंडवीरां चण्डमायां चण्डमुण्डप्रभंजनीम् ।
पूजयामि सदा देवीं चंडिकां चंडविक्रमाम् ॥ ७ ॥

अष्टवर्षा शांभवी, तत्पूजामंत्रः—

सदानंदकरीं शान्तां सर्वदेवनमस्कृताम् ।
सर्वभूतात्मिकां लक्ष्मीं शांभवीं पूजयाम्यहम् ॥ ८ ॥

नवहायनी दुर्गा, तत्पूजामंत्रः—

दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम् ।
पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीम् ॥ ९ ॥

दशवर्षा सुभद्रा, तत्पूजामंत्रः—

सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ।
सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम् ॥ १० ॥

इति प्रत्येकं मन्त्रान्ते तत्तन्नाममंत्रेण नवापि षोडशोपचारैः पंचोपचारैर्वा पूजयेदिति ॥

॥ अथ बलिदानम् ॥

मूल मंत्रान्ते श्रीमहालक्ष्म्यै नमः पायसबलिं समर्पयामि इति महाकाल्यादियोगिन्यंतयंत्रस्थावरणदेवताभ्यः प्रत्येकं सर्वाभ्यो बलीन् दद्यात् ॥

अथ कूष्मांडबलिः ॥

आचम्य प्राणानायम्य देशकालाद्युच्चार्य मम सकुटुम्बस्य सर्वारिष्टशान्तिसर्वाभीष्टसिद्धिकल्पोक्तफलावाप्तिद्वारा श्रीमहाकाली महालक्ष्मी महासरस्वती देवताप्रीत्यर्थं कूष्माण्डबलिदानं करिष्ये। तदंगत्वेन पंचोपचारैः पूजनं बलिपूजनं च करिष्ये ॥

मूलमंत्रेणमुख्यदेवतां पंचोपचारैः संपूज्य तत्पुरतः स्वयमुदङ्मुखो बलिं प्राङ्मुखं पीठे वस्त्रगुंठितं कूष्माडं निधाय ॐ कूष्मांडबलये नमः ॥ इति आवाहनवस्त्रगंधादिभिः संपूज्याभिमंत्रयेत् ॥

पशुस्त्वं बलिरूपेण मम भाग्यादवस्थितः।
प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥ १ ॥

चण्डिकाप्रीति दानेन दातुरापद्विनाशनम् ।
चामुण्डाबलिरूपाय बले तुभ्यं नमोऽस्तु ते ॥ २ ॥

यज्ञार्थं बलयः सृष्टाः स्वयमेव स्वयंभुवा ।
अतस्त्वां घातयाम्यद्य यस्माद्यज्ञं वधोऽवधः ॥ ३ ॥

ततः शस्त्रं गंधादिना संपूज्याभिमंत्रयेत् । ॐ ऐं ह्रीं श्रीं रसना त्वं चंडिकायाः सुरलोकप्रसाधकः । इति ह्रां ह्रीं खड्ग आं हुं फट् इति हस्ते शस्त्रं गृहीत्वा ॐ कालवज्रेश्वरि लौहदंडायै नमः इति पठन् कूष्माडं छित्त्वा छेदनावसरे तं न विलोकयेत् ॥

कौशिकी रुधिरेणाप्यायतामिति देव्यै तदर्धं निवेद्य अवशिष्टार्धस्य पञ्चभागान् कृत्वा पूतनायै बलिभागं निवेदयामि । चरक्यै बलिभागं निवेदयामि । पापराक्षस्यै बलिभागं निवेदयामि । ततो माषपिष्टपशुं शत्रुं शस्त्रेण छित्त्वा स्कंदाय पश्वर्धं समर्पयामि विशिखाय पश्वर्धं समर्पयामि इति समर्प्य शेषं रक्षोभ्यो हरेत् ॥

मंत्रास्तु—ॐ ह्रीं स्फुर स्फुर ॐ फ्रीं ॐ हुं फट् मर्द मर्द हुं इति तच्छेषं बहिर्दद्यात् ।

बलिं गृह्णंत्विमे देवा आदित्या वसवस्तथा ।
मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥
असुरा यातुधानाश्च पिशाचोरगराक्षसाः ।
डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥
जृम्भकासिद्धगंधर्वाः साध्या विद्याधरानगाः ।
दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥
जगतां शान्तिकर्तारो ब्रह्माद्याश्च महर्षयः ।
मा विघ्नं मा च मे पापं मा संतु परिपंथिनः ॥
सौम्या भवन्तु तृप्तास्ते भूतप्रेताः सुखावहाः ॥
भूतानि यानीह वसंति तानि बलिं गृहीत्वा विधिवत्प्रयुक्तम् ॥
अन्यत्र वासं परिकल्पयंतु रक्षंतु मां तानि सदैव चात्र ॥ इति ॥

ततः स्नात्वा कृततिलको देवीं प्रार्थयेत्—

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी बाणभुशुण्डीपरमायुधा ॥ १ ॥
शूलेन पाहिनो देवि पाहि खड्गे न चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ २ ॥
सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥ ३ ॥

रूपं देहि जयं देहि यशो देहि द्विषो जहि ।
पुत्रान् देहि धनं देहि सर्वान्कामांश्च देहि मे ॥
महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ।
आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते ॥
इति प्रार्थयेत् ॥

एतद् बलिदानं होमांगं तच्च होमोत्तरमेव ॥ पूजांगं वैकल्पिकं तत्र च पायसबलिदानमवश्यमेवेति बलिदानविधिः ॥

॥ अथ पुस्तकपूजनं ॥

मूलमंत्रेणाचम्य प्राणानायम्य ॥ ॐ नमः पिशाचिनि करंकिनि त्रिशूलखड्गहस्ते सिंहारूढे एह्येहि आगच्छ आगच्छ इमां पूजां गृह्ण गृह्ण स्वाहा । सप्तशतीरूपिण्यै सरस्वत्यै नमः इति मंत्रेणावाह्य ॐ ह्रीं चण्डिकायै नमः इति मंत्रेण षोडशोपचारैः पूजयेत् ॥

अथ शापोद्धारोत्कीलनमंत्रः ॥


ॐ ह्रीं क्लीं श्रीं क्रां क्रीं चण्डिके देवि शापानुग्रहं कुरु कुरु स्वाहा ॥ इति सप्तवारं शापोद्धारमंत्रं जपित्वा ॐ श्रीं

क्लीं ह्रीं सप्तशति चण्डिके उत्कीलनं कुरु कुरु इत्येकविंशति-वारमुत्कीलनमंत्रं जपेदिति ॥

ततोऽर्थानुसंधानपूर्वकं कवचार्गलकीलकं पठित्वा सप्त-शत्युक्तं रात्रिसूक्तं वेदोक्तं रात्री व्यख्यदायतीति वा पठित्वा नवार्णं जपेत् ॥ तत्र कवचं सार्धपंचपंचाशच्छ्लोकात्मकं कीलकं चतुर्दश श्लोकात्मकं पठेत् ॥

॥ इति पाठक्रमः ॥

॥ श्रीदुर्गासप्तशती ॥



॥ अथ कवचम् ॥

अस्य श्री चण्डीकवचस्य ब्रह्मा ऋषिः अनुष्टुप्छंदः चामुण्डा देवता अंगन्यासोक्तमातरो बीजं दिग्बंधदेवतास्तत्त्वं श्रीत्रिगुणादेवीप्रीत्यर्थं जपे विनियोगः ॥

॥ ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच ॥

ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ॥
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥ १ ॥

॥ ब्रह्मोवाच ॥

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ॥
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥ २ ॥

प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी ॥
तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ॥ ३ ॥
पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च ॥
सप्तमं कालरात्रिश्च महागौरीति चाष्टमम् ॥ ४ ॥
नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः ॥
उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥ ५ ॥
अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ॥
विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥ ६ ॥
न तेषां जायते किंचिदशुभं रणसङ्कटे ॥
नापदं तस्य पश्यामि शोकदुःखभयं नहि ॥ ७ ॥
यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते ॥
प्रेतसंस्था तु चामुण्डा वाराही महिषासना ॥ ८ ॥
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना ॥
माहेश्वरी वृषारूढा कौमारी शिखिवाहना ॥ ९ ॥
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥
श्वेतरूपधरा देवी ईश्वरी वृषवाहना ॥ १० ॥
ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ॥
इत्येता मातरः सर्वाः सर्वयोगसमन्विताः ॥ ११ ॥

नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥
दृश्यंते रथमारूढा देव्यः क्रोधसमाकुलाः ॥ १२ ॥
शंखं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥
खेटकं तोमरं चैव परशुं पाशमेव च ॥ १३ ॥
कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् ॥
दैत्यानां देहनाशाय भक्तानामभयाय च ॥ १४ ॥
धारयन्त्यायुधानीत्थं देवानां च हिताय वै ॥
नमस्तेस्तु महारौद्रे महाघोरपराक्रमे ॥ १५ ॥
महाबले महोत्साहे महाभयविनाशिनि ॥
त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि ॥ १६ ॥
प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता ॥
दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी ॥ १७ ॥
प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी ॥
उदीच्यां पातु कौबेरी ईशान्यां शूलधारिणी ॥ १८ ॥
ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा ॥
एवं दश दिशो रक्षेच्चामुंडा शववाहना ॥ १९ ॥
जया मे चाग्रतः पातु विजया पातु पृष्ठतः ॥
अजिता वामपार्श्वे तु दक्षिणे चापराजिता ॥ २० ॥

शिखां मे द्योतिनी रक्षेदुमामूर्ध्नि व्यवस्थिता ॥
मालाधरी ललाटे च भ्रुवौरक्षेद्यशस्विनी ॥ २१ ॥
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ॥
शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ॥ २२ ॥
कपोलौ कालिका रक्षेत् कर्णमूले तु शाङ्करी ॥
नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ॥ २३ ॥
अधरे चामृतकला जिह्वायां च सरस्वती ॥
दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका ॥ २४ ॥
घण्टिकां चित्रघण्टा च महामाया च तालुके ॥
कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमङ्गला ॥ २५ ॥
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥
नीलग्रीवा बहिः कण्ठे नलिकां नलकूबरी ॥ २६ ॥
खड्गधारिण्युभौ स्कन्धौ बाहू मे वज्रधारिणी ॥
हस्तयोर्दंडिनी रक्षेदम्बिका चांगुलीषु च ॥ २७ ॥
नखाञ्छूलेश्वरी रक्षेत् कुक्षौ रक्षेन्नलेश्वरी ॥
स्तनौ रक्षेन्महादेवी मनःशोक विनाशिनी ॥ २८ ॥
हृदये ललिता देवी ह्युदरे शूलधारिणी ॥
नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा ॥ २९ ॥

भूतनाथा च मेढ्रं मे गुदे महिषवाहिनी ॥
कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी ॥ ३० ॥
जंघे महाबला रक्षेत् सर्वकामप्रदायिनी ॥
गुल्फयोर्नारसिंही च पादौ चामिततेजसी ॥ ३१ ॥
पादांगुलीः श्रीर्मे रक्षेत् पादाधस्तलवासिनी ॥
नखान् दंष्ट्रकराली च केशांश्चैवोर्ध्वकेशिनी ॥ ३२ ॥
रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा ॥
रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ॥ ३३ ॥
अंत्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥
पद्मावती पद्मकोशे कफे चूड़ामणिस्तथा ॥ ३४ ॥
ज्वालामुखी नखज्वालामभेद्या सर्वसंधिषु ॥
शुक्रं ब्रह्माणी मे रक्षेच्छायां छत्रेश्वरी तथा ॥ ३५ ॥
अहंकारं मनो बुद्धिं रक्षेन्मे धर्मचारिणी ॥
प्राणापानौ तथा व्यानमुदानं च समानकम् ॥ ३६ ॥
वज्रहस्ता च मे रक्षेत् प्राणकल्पं च शोभनम् ॥
रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ॥ ३७ ॥
सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥
आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी ॥ ३८ ॥

यशः कीर्तिं च लक्ष्मीं च सदा रक्षंतु मातरः ॥
गोत्रमिंद्राणी मे रक्षेत् पशून्मे रक्ष चण्डिके ॥ ३९ ॥
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥
पंथानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा ॥ ४० ॥
राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता ॥
रक्षाहीनं तु यत् स्थानं वर्जितं कवचेन तु ॥ ४१ ॥
तत्सर्वं रक्ष मे देवि जयंती पापनाशिनी ॥
पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ॥ ४२ ॥
कवचेनावृतो नित्यं यत्र यत्राधिगच्छति ॥
तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः ॥ ४३ ॥
यं यं कामयते कामं तं तं प्राप्नोति निश्चितम् ॥
परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ॥ ४४ ॥
निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः ॥
त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ॥ ४५ ॥
इदं तु देव्याः कवचं देवानामपि दुर्लभम् ॥
यः पठेत्प्रयतो नित्यं त्रिसंध्यं श्रद्धयान्वितः ॥ ४६ ॥
दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजितः ॥
जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ॥ ४७ ॥

नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः ॥
स्थावरं जङ्गमं चैव कृत्रिमं चापि यद्विषम् ॥ ४८ ॥
अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले ॥
भूचराः खेचराश्चैव जलजाश्चौपदेशिकाः ॥ ४९ ॥
सहजा कुलजा माला शाकिनी डाकिनी तथा ॥
अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः ॥ ५० ॥
ग्रहभूतपिशाचाश्च यक्षगंधर्वराक्षसाः ॥
ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः ॥ ५१ ॥
नश्यंति दर्शनात्तस्य कवचं हृदि संस्थिते ॥
मानोन्नतिर्भवेद्राज्ञस्तेजोवृद्धिकरं परम् ॥ ५२ ॥
यशसा वर्धते सोऽपि कीर्तिमण्डितभूतले ॥
जपेत् सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ॥ ५३ ॥
यावद्भूमण्डलं धत्ते सशैलवनकाननम् ॥
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी ॥ ५४ ॥
देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥
प्राप्नोति पुरुषो नित्यं महामाया प्रसादतः ॥ ५५ ॥

इति श्रीवाराहपुराणे हरिहरब्रह्मप्रणीतं
देव्याः कवचं समाप्तम् ॥

॥ अथार्गलास्तुतिः ॥

अस्य श्रीअर्गलास्तोत्रमंत्रस्य विष्णुर्ऋषिः अनुष्टुप् छंदः श्रीमहालक्ष्मीर्देवता श्रीजगदंबाप्रीत्यर्थे जपे विनियोगः ॥

॥ ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच ॥

जयन्ती मङ्गला काली भद्रकाली कपालिनी ॥
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते ॥ १ ॥
मधुकैटभविद्रावि विधातृ वरदे नमः ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २ ॥
महिषासुरनिर्नाशि विधातृवरदे नमः ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ३ ॥
रक्तबीज बधे देवि चण्डमुण्डविनाशिनी ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ४ ॥
शुंभस्यैव निशुंभस्य धूम्राक्षस्य च मर्दिनो ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ५ ॥
वंदितांघ्रियुगे देवि सर्वसौभाग्यदायिनी ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ६ ॥

अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ७ ॥
न तेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ८ ॥
स्तुवद्भ्यो भक्तिपूर्वं त्वां चंडिके व्याधिनाशिनि ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ९ ॥
चंडिके सततं ये त्वामर्चयंतीह भक्तितः ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १० ॥
देहि सौभाग्यमारोग्यं देहि देवि परं सुखम् ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ११ ॥
विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १२ ॥
विधेहि देवि कल्याणं विधेहि परमां श्रियम् ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १३ ॥
विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १४ ॥
प्रचंडदैत्यदर्पघ्ने चण्डिके प्रणताय मे ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १५ ॥

चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १६ ॥
कृष्णेन संस्तुते देवि शश्वद्भक्त्या त्वमम्बिके ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १७ ॥
हिमाचलसुतानाथसंस्तुते परमेश्वरि ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १८ ॥
सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १९ ॥
इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २० ॥
देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २१ ॥
पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २२ ॥
देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २३ ॥
पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ॥
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥ २४ ॥

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ॥
स तु सप्तशतीसंख्यावरमाप्नोति संपदाम् ॥ २५ ॥

॥ इति मार्कण्डेयपुराणे अर्गलास्तोत्रं सम्पूर्णम् ॥

॥ अथ कीलकम् ॥

अस्य श्रीकीलकमंत्रस्य शिव ऋषिः अनुष्टुप् छन्दः श्रीमहासरस्वती देवता श्रीजगदम्बाप्रीत्यर्थे जपे विनियोगः ॥

॥ ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच ॥

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ॥
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥ १ ॥
सर्वमेतद्विना यस्तु मन्त्राणामपि कीलकम् ॥
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ॥ २ ॥
सिद्ध्यन्त्युच्चटानादीनि वस्तूनि सकलान्यपि ॥
एतेन स्तुवतां नित्यं स्तोत्रमात्रेण सिद्ध्यति ॥ ३ ॥
न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते ॥
विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ॥ ४ ॥

समग्राण्यपि सिध्यन्ति लोकशङ्कामिमां हरः ॥
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ॥ ५ ॥
स्तोत्रं वै चण्डिकायास्तु तच्च गुह्यं चकार सः ॥
समाप्नोति स पुण्येन तां यथावन्नियन्त्रणाम् ॥ ६ ॥
सोपि क्षेममवाप्नोति सर्वमेव न संशयः ॥
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ॥ ७ ॥
ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति ॥
इत्थं रूपेण कीलेन महादेवेन कीलितम् ॥ ८ ॥
यो निष्कीलां विधायैनां नित्यं जपति सुस्फुटम् ॥
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः ॥ ९ ॥
न चैवाप्यटतस्तस्य भयं क्वापि हि जायते ॥
नाल्पमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥ १० ॥
ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ॥
ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ॥ ११ ॥
सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजने ॥
तत्सर्वं त्वत्प्रसादेन तेन जाप्यमिदं शुभम् ॥ १२ ॥
शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः ॥
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥ १३ ॥

ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः ॥
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥ १४ ॥

❀ इति श्रीभगवत्याः कीलकस्तोत्रं समाप्तम् ❀

॥ अथ नवार्णमंत्रम् ॥

ॐ अस्य श्रीनवार्णमन्त्रस्य । ब्रह्मविष्णुमहेश्वरा ऋषयः । गायत्र्युष्णिगनुष्टुप्छन्दांसि । श्रीमहाकालीमहालक्ष्मी-महासरस्वत्यो देवताः । नन्दाशाकम्भरीभीमाः शक्तयः । रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि । अग्निवायुसूर्यास्तत्त्वानि । सप्तशतीपाठांगत्वेन नवार्णमन्त्रजपे विनियोगः ॥

ॐ ब्रह्मविष्णुमहेश्वरऋषिभ्यो नमः शिरसि ॥
ॐ गायत्र्युष्णिगनुष्टुप्छन्दोभ्यो नमः मुखे ॥
ॐ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमः हृदये ॥
ॐ नन्दाशाकम्भरीभीमाशक्तिभ्यो नमः दक्षिणस्तने ॥

ॐ रक्तदन्तिकादुर्गाभ्रामरीबीजेभ्यो नमः वामस्तने ॥
ॐ अग्निवायुसूर्यतत्त्वेभ्यो नमः नाभौ ॥

इति ऋष्यादिन्यासः ॥ ॥ मूलेन करौ संशोध्य ॥

॥ अथ एकादशन्यासाः ॥

तत्रादौ प्राथमिकंदेवसारूप्यप्रदं मातृकान्यासं कृत्वा ॥ १ ॥ द्वितीयं सारस्वताभिधं कुर्यात् ॥

॥ मातृकान्यासः ॥

ॐ अंनमो ललाटे ॥ ॐ आंनमो मुखवृत्ते ॥
ॐ इंनमो दक्षिणनेत्रे ॥ ॐ ईंनमो वामनेत्रे ॥
ॐ उंनमो दक्षिणकर्णे ॥ ॐ ऊंनमो वामकर्णे ॥
ॐ ऋंनमो दक्षिणनसि ॥ ॐ ॠंनमो वामनसि ॥
ॐ ऌंनमो दक्षिणगंडे ॥ ॐ ॡंनमो वामगंडे ॥
ॐ एंनमः ऊर्ध्वोष्ठे ॥ ॐ ऐंनमोऽधरोष्ठे ॥
ॐ ओंनमः ऊर्ध्वदंतपंक्तौ ॥ ॐ औंनमोऽधोदंतपंक्तौ ॥
ॐ अंनमः शिरसि ॥ ॐ अःनमो मुखे ॥

ॐ कंनमो दक्षबाहुमूले ॥ ॐ खंनमो दक्षकूर्परे ॥
ॐ गंनमो दक्षमणिबंधे ॥ ॐ घंनमो दक्षांगुलिमूले ॥
ॐ ङंनमो दक्षांगुल्यग्रे ॥ ॐ चंनमो वामबाहुमूले ॥
ॐ छंनमो वामकूर्परे ॥ ॐ जंनमो वाममणिबंधे ॥
ॐ झंनमो वामांगुलिमूले ॥ ॐ ञंनमो वामांगुल्यग्रे ॥
ॐ टंनमो दक्षपादमूले ॥ ॐ ठंनमो दक्षजानुनि ॥
ॐ डं नमो दक्षगुल्फे ॥ ॐ ढंनमो दक्षपादांगुलिमूले ॥
ॐ णंनमो दक्षपादांगुल्यग्रे ॥ ॐ तंनमो वामपादमूले ॥
ॐ थंनमो वामजानुनि ॥ ॐ दंनमो वामगुल्फे ॥
ॐ धंनमो वामपादांगुलिमूले ॥ ॐ नंनमो वामपादांगुल्यग्रे ॥
ॐ पंनमो दक्षपार्श्वे ॥ ॐ फंनमो वामपार्श्वे ॥
ॐ बंनमः पृष्ठे ॥ ॐ भंनमो नाभौ ॥
ॐ मंनमो जठरे ॥ ॐ यंनमो हृदि ॥
ॐ रंनमो दक्षांसे ॥ ॐ लंनमः ककुदि ॥
ॐ वंनमो वामांसे ॥ ॐ शंनमो हृदादिदक्षहस्तान्ते ॥
ॐ षंनमो हृदादिवामहस्तांते ॥ ॐ संनमो हृदादिदक्षपादांते ॥
ॐ हंनमो हृदादिवामपादान्ते ॥ ळंनमो जठरे ॥ ॐ क्षंनमो मुखे ॥

इति मात्रिकान्यासो देवसारूप्यप्रदः प्रथमः ॥

ॐ ऐं ह्रीं क्लीं नमः कनिष्ठिकयोः ॥
ॐ ऐं ह्रीं क्लीं नमः अनामिकयोः ॥
ॐ ऐ ह्रीं क्लीं नमः मध्यमयोः ॥
ॐ ऐं ह्रीं क्लीं नमः तर्जन्योः ॥
ॐ ऐं ह्रीं क्लीं नमः अंगुष्ठयोः ॥
ॐ ऐं ह्रीं क्लीं नमः करमध्ये ॥
ॐ ऐं ह्रीं क्लीं नमः करपृष्ठे ॥
ॐ ऐं ह्रीं क्लीं नमः मणिबन्धयोः ॥
ॐ ऐं ह्रीं क्लीं नमः कूर्परयोः ॥
ॐ ऐं ह्रीं क्लीं नमः हृदयाय नमः
ॐ ऐं ह्रीं क्लीं नमः शिरसे स्वाहा ॥
ॐ ऐं ह्रीं क्लीं नमः शिखायै वषट् ॥
ॐ ऐं ह्रीं क्लीं नमः कवचाय हुं ॥
ॐ ऐं ह्रीं क्लीं नमो नेत्रत्रयाय वौषट् ॥
ॐ ऐं ह्रीं क्लीं नमोऽस्त्राय फट् ॥

॥ इति सारस्वताभिधो जाड्यविनाशको द्वितीयः ॥ २ ॥

ॐ ह्रीं ब्राह्मी पूर्वस्यां मां पातु ।
ॐ ह्रीं माहेश्वरी आग्नेय्यां मां पातु ।

ॐ ह्रीं कौमारी दक्षिणस्यां मां पातु ।
ॐ ह्रीं वैष्णवी नैर्ऋत्यां . मां पातु ।
ॐ ह्रीं वाराही पश्चिमायां मां पातु ।
ॐ ह्रीं इन्द्राणी वायव्यां मां पातु ।
ॐ ह्रीं चामुण्डा उत्तरस्यां मां पातु ।
ॐ ह्रीं महालक्ष्मीरैशान्यां मां पातु ।
ॐ ह्रीं व्योमेश्वरी ऊर्ध्वं मां पातु ।
ॐ ह्रीं सप्तद्वीपेश्वरी भूमौ मां पातु ।
ॐ ह्रीं कामेश्वरी पाताले मां पातु ।

इति त्रैलोक्यविजयप्रदो मातृगणन्यासस्तृतीयः ॥ ३ ॥

ॐ कमलांकुशमंडिता नन्दजा पूर्वांगं मे पातु ।
खड्गपात्रधरा रक्तदन्तिका दक्षिणांगं मे पातु ।
पुष्पपल्लवसंयुता शाकंभरी पश्चिमांगं मे पातु ।
धनुर्बाणकरा दुर्गा वामांगं मे पातु ।
शिरः पात्रकरा भीमा मस्तकाच्चरणावधि मां पातु ।
चित्रकांतिभृद्भ्रामरी पादादि मस्तकांतं मे पातु ।

इति नन्दजादि न्यासो जरामृत्युहरश्चतुर्थः ॥ ४ ॥

पादादिनाभिपर्यंतं ब्रह्मा मां पातु ।
नाभेर्विशुद्धिपर्यंतं जनार्दनो मां पातु ।
विशुद्धेर्ब्रह्मरंध्रांतं रुद्रो मां पातु ।
हंसो मे पदद्वय पातु । वैनतेयः करद्वयं मे पातु ।
वृषभः चक्षुषी मे पातु ।
गजाननः सर्वांगं मे पातु ।
आनन्दमयो हरिः परापरौ देहभागौ मे पातु ॥
॥ इति सर्वकामप्रदो ब्रम्हादिन्यासः पञ्चमः ॥ ५ ॥
अष्टादशभुजा महालक्ष्मीर्मध्यभागं मे पातु ।
अष्टभुजा महासरस्वती ऊर्ध्वभागं मे पातु ।
दशभुजा महाकाली अधोभागं मे पातु ।
सिंहो हस्तद्वयं मे पातु ।
हंसोऽक्षियुगं मे पातु ।
महिषारूढो यमः पदद्वयं मे पातु ।
महेशश्चण्डिकायुक्तः सर्वांगं मे पातु ॥
॥ इति सद्गतिप्रदो महालक्ष्म्यादिन्यासः षष्ठः ॥ ६ ॥
ॐ ऐं नमः ब्रह्मरन्ध्रे ॥ ॐ ह्रीं नमः दक्षनेत्रे ॥
ॐ क्लीं नमः वामनेत्रे ॥ ॐ चां नमः दक्षकर्णे ॥

ॐ मुं नमः वामकर्णे ॥ ॐ डां नमः दक्षनासापुटे ॥
ॐ यैं नमः वामनासापुटे ॥ ॐ विं नमः मुखे ॥
ॐ च्चें नमः गुह्ये ॥

॥ इति मूलाक्षरादिन्यासो रोगक्षयकरः सप्तमः ॥ ७ ॥

ॐ च्चें नमो गुह्ये ॥ ॐ विं नमो मुखे ॥
ॐ यैं नमो वामनासापुटे ॥ ॐ डां नमो दक्षनासापुटे ॥
ॐ मुं नमो वामकर्णे ॥ ॐ चां नमो दक्षकर्णे ॥
ॐ क्लीं नमो वामनेत्रे ॥ ॐ ह्रीं नमो दक्षनेत्रे ॥
ॐ ऐं नमो ब्रह्मरन्ध्रे ॥

॥ इति विलोमाक्षरन्यासः सर्वदुःखनाशकोऽष्टमः ॥ ८ ॥

मूलमुच्चार्य मस्तकाच्चरणांतं चरणान्मस्तकांतं व्यापकमष्टवारं कुर्यात् ॥ यथा—

प्रथमं पुरतो मूलेन मस्तकाच्चरणावधि ॥ १ ॥ ततश्चरणान्मस्तकावधिमूलोच्चारेण व्यापकम् ॥ २ ॥ एवं दक्षिणतः पश्चाद्वामभागे चेति प्रतिदिग्भागेऽनुलोमविलोमतया रिति अष्टवारं व्यापकं भवति ॥

॥ इति देवताप्राप्तिकरो मूलव्यापकन्यासो नवमः ॥९॥

ॐ ऐं ह्रीं क्लीं हृदयाय नमः ॥

एवं प्रत्येकमंगं मूलमुच्चार्य षडंगेषु न्यसेदिति

त्रैलोक्यवशकरो मूलषडंगन्यासो दशमः ॥ १० ॥

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥

शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ॥ १ ॥

सौम्या सौम्यतरा शेषसौम्येभ्यस्त्वतिसुन्दरी ॥

परापराणां परमा त्वमेव परमेश्वरी ॥ २ ॥

यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥

तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ॥ ३ ॥

यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥

सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ ४ ॥

विष्णुः शरीरग्रहणमहमीशान एव च ॥

कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥५॥

आद्यं वाग्बीजं कृष्णतरं ध्यात्वा सर्वांगे विन्यसामि ॥

॥ इति सर्वांगे न्यसेत् ॥

शूलेन पाहि नो देवि पाहि खड्गेन चांबिके ॥

घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ १ ॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ २ ॥
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते ॥
यानि चात्यंतघोराणि तै रक्षास्मांस्तथा भुवम् ॥ ३ ॥
खड्गशूलगदादीनि यानि चास्त्राणि तेम्बिके ॥
करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः ॥ ४ ॥

॥ इति द्वितीयं मायाबीजं सूर्यसदृशं ध्यात्वा सर्वांगे विन्यसेत् ॥

सर्वस्वरूपे सर्वेशे सर्वशक्ति समन्विते ॥
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते ॥ १ ॥
एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ॥
पातु नः सर्वभूतेभ्यः कात्यायनि नमोस्तु ते ॥ २ ॥
ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ॥
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तु ते ॥ ३ ॥
हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥
सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव ॥ ४ ॥
असुरासृग्वसापंकचर्चितस्ते करोज्ज्वलः ॥
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥ ५ ॥

॥ तृतीयं कामबीजं स्फटिकाभं ध्यात्वा सर्वांगे विन्यसामि ॥
इति सर्वांगे विन्यसेत् ॥ इति सूक्तादिबीजत्रयन्यासः ॥
पञ्चमः सर्वानिष्टहरः सर्वाभीष्टदःसर्वरक्षाकरश्चैकादशः ॥११॥
पुनः षडंगन्यासं कुर्यात् ॥ स यथा—
ॐ ऐं हृदयाय नमः ॥ ॐ ह्रीं शिरसे नमः ॥
ॐ क्लीं शिखायै वषट् ॥ ॐ चामुंडायै कवचाय हुँ ॥
ॐ विच्चे नेत्रत्रयाय वौषट् ॥
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट् ॥

॥ अथाक्षरन्यासः ॥

ॐ ऐं नमः शिखायां ॥ ॐ ह्रीं नमः दक्षनेत्रे ॥
ॐ क्लीं नमः वामनेत्रे ॥ ॐ चां नमः दक्षकर्णे ॥
ॐ मुं नमः वामकर्णे ॥ ॐ डां नमः दक्षनासापुटे ॥
ॐ यैं नमः वामनासापुटे ॥ ॐ विं नमः मुखे ॥
ॐ च्चें नमः गुह्ये ॥
समस्तमंत्रमुच्चार्याष्टवारं व्यापकं पूर्ववच्चरेत् ॥
ॐ ऐं प्राच्यै नमः ॥ ॐ ऐं आग्नेयै नमः ॥
ॐ ह्रीं दक्षिणायै नमः ॥ ॐ ह्रीं नैर्ऋत्यै नमः ॥
ॐ क्लीं प्रतीच्यै नमः ॥ ॐ क्लीं वायव्यै नमः ॥

ॐ चामुंडायै उदीच्यै नमः ॥ ॐ विच्चे ईशान्यै नमः ॥
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ऊर्ध्वायै नमः ॥
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे भूम्यै नमः ॥

॥ अथ देवी ध्यानम् ॥

खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः
शंखं संदधतीं करैस्त्रिनयनां सर्वांगभूषावृताम् ॥
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कैटभम् ॥ १ ॥

अक्षस्रक्परशू गदेषुकुलिशं पद्मं धनुः कुण्डिकां
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ॥
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥ २ ॥

घण्टाशूलहलानि शंखमुसले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनांतविलसच्छीतांशुतुल्यप्रभाम् ॥
गौरीदेहसमुद्भवां त्रिनयनामाधारभूतां
महापूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ॥ ३ ॥

एवं देवीं ध्यात्वा मानसोपचारैः संपूज्य मालां प्रार्थयेत् ॥

ॐ महामाले महामाये सर्वशक्तिस्वरूपिणि ॥

चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥

इति मंत्रेण मालां प्रार्थ्य ॐ सिद्ध्यै नमः इति मालां नत्वा जपेत् ।

(मंत्रार्थः ॥ महासरस्वत्यादिरूपे चित्सदानन्दमये चण्डिके त्वां ब्रह्मविद्याप्राप्त्यर्थं वयं सर्वदा ध्यायामः ।)

इति मंत्रार्थानुसंधानपूर्वकमष्टोत्तरशतं १०८ सहस्रं वा नवार्णमंत्रं जपेत् ॥ जपांते गुह्येत्यादिना जपं समाप्य सप्तशतीं पठेत् ॥ ततो रात्रिसूक्तं पठेत् ॥ तत्रादौ ऋग्वेदोक्तं रात्रिसूक्तं यथा—

रात्रीव्यख्यदिति सूक्तस्य कुशिक ऋषिः रात्रिर्देवता गायत्री छन्दः श्रीजगदम्बाप्रीत्यर्थे जपे विनियोगः ॥

ॐ रात्रीव्यख्यदायतीपुरुत्रादेव्य १ क्षभिः ॥

विश्वाअधिश्रियोधित ॥ ओर्वप्रा अमर्त्यानिवतोदेव्युद्वतः ॥

ज्योतिषाबाधतेतमः ॥ निरुस्वसारमस्कृतोषसं देव्यायती ॥

अपेदुहासतेतमः ॥ सानो अद्ययस्यावयंनिते यामंनविद्महि।
वृक्षेनवसतिंवयः ॥ निग्रामा सोअविक्षतनिपद्वंतोनि-
पक्षिणः ॥ निश्येना सश्चिदर्थिनः ॥ यावया-
वृक्र्यं १ वृकंयवयस्तेनमूर्म्ये ॥ अथानः सुतराभव ॥
उपमापेपिशत्तमः कृष्णंव्यक्तमस्थित ॥ उषऋणे-
वयातया ॥ उपते गाइवाकरं वृणीष्वदुहितर्दिवः ॥
रात्रिस्तोमंन जिग्युषे ॥ १ ॥

इति ऋग्वेदोक्तं रात्रिसूक्तम् ॥

॥ अथ तंत्रोक्तं रात्रिसूक्तम् ॥

विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥ १ ॥

॥ ब्रह्मोवाच ॥

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥
सुधा त्वमक्षरे नित्या त्रिधामात्रात्मिका स्थिता ॥ २ ॥

अर्धमात्रा स्थिता नित्या यामुच्चार्या विशेषतः ॥
त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा ॥ ३ ॥
त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥
त्वयैतत्पाल्यते देवि त्वमत्स्यंते च सर्वदा ॥ ४ ॥
विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥
तथा संहृतिरूपांते जगतोऽस्य जगन्मये ॥ ५ ॥
महाविद्या महामाया महामेधा महास्मृतिः ॥
महामोहा च भवती महादेवी महेश्वरी ॥ ६ ॥
प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनि ॥
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥ ७ ॥
त्वं श्रीस्त्वमीश्वरीस्त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥
लज्जापुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरेव च ॥ ८ ॥
खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥
शंखिनी चापिनी बाणाभुशुण्डीपरिघायुधा ॥ ९ ॥
सौम्या सौम्यतरा शेषसौम्येभ्यस्त्वतिसुन्दरी ॥
परापराणां परमा त्वमेव परमेश्वरी ॥ १० ॥
यच्च किंचित् क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ॥११॥

यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ १२॥

विष्णुः शरीरग्रहणमहमीशान एव च ॥
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥१३॥

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥ १४ ॥

प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥
बोधश्च क्रियतामस्य हंतुमेतौ महासुरौ ॥ १५ ॥

॥ इति तंत्रोक्तं रात्रिसूक्तम् ॥

एतेषां श्रीप्रथममध्यमोत्तमचरित्राणां ब्रह्मविष्णुरुद्रा ऋषयः ॥ गायत्र्युष्णिगनुष्टुप्छंदांसि ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः॥ नन्दाशाकम्भरीभीमाः शक्तयः ॥ रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि ॥ अग्निवायुसूर्यास्तत्त्वानि ॥ ऋग्यजुःसामवेदा ध्यानानि ॥ चतुर्विधपुरुषार्थसिद्ध्यर्थं श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीत्यर्थं च सप्तशतीजपे विनियोगः ॥

॥ तत्रादौ न्यासः ॥

ॐ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि ॥
ॐ गायत्र्युष्णिगनुष्टुप्छंदोभ्यो नमः मुखे ॥
ॐ महाकालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमः हृदये ।
ॐ ऐं ह्रीं क्लीं बीजेभ्यो नमः गुह्ये ॥
ॐ अग्निवायुसूर्यतत्त्वेभ्यो नमः पादयोः ॥
ॐ ह्रीं हृदयाय नमः । ॐ चं शिरसे स्वाहा ॥
ॐ डिं शिखायै वषट् ॥ ॐ कां कवचाय हुं ॥
ॐ यैं नेत्रत्रयाय वौषट् ॥ ॐ ह्रीं चण्डिकायै अस्त्राय फट्॥

॥ अथ चक्रन्यासः ॥

ॐ शंभुतेजोज्वलज्ज्वालामालिनिपावके
ह्रां नन्दायै अंगुष्ठाभ्यां नमः ॥
ॐ शंभुतेजोज्वलज्ज्वालामालिनी पावके
ह्रीं रक्तदन्तिकायै तर्जनीभ्यां नमः ॥
ॐ शंभुतेजोज्वलज्ज्वालामालिनि पावके
ह्रूं शाकंभर्यै मध्यमाभ्यां नमः ॥
ॐ शंभुतेजोज्वलज्ज्वालामालिनि पावके
ह्रैं दुर्गायै अनामिकाभ्यां नमः ॥

ॐ शंभुतेजोज्वलज्ज्वालामालिनि पावके
ह्रौं भीमायै कनिष्ठिकाभ्यां नमः ॥
ॐ शंभुतेजोज्वलज्ज्वालामालिनि पावके
ह्रः भ्रामर्यै करतलकरपृष्ठाभ्यां नमः ॥ अस्त्राय फट् ॥
एवं हृदयादिषडंगन्यासः ॥

॥ अथांगन्यासः ॥

ॐ वाराह्यै नमः पादयोः ॥ ॐ नारसिंह्यै नमः नितम्बे ॥
ॐ चामुण्डायै नमः नाभौ ॥ ॐ माहेंद्रैच नमः कण्ठे ॥
ॐ ब्राह्म्यै नमः पृष्ठे ॥ ॐ वैष्णव्यै नमः दक्षिणभुजे ॥
ॐ माहेश्वर्यै नमः वामभुजे ॥ ॐ कौमार्यै नमः स्कन्धयोः ॥
ॐ कात्यायन्यै नमः मुखे ॥ ॐ शिवदूत्यै नमः शिरसि ॥
ॐ शिवायै नमः हृदि ॥ ॐ काल्यै नमः दक्षिणकुक्षौ ॥
ॐ रक्तदंतिकायै नमः वामकुक्षौ ॥ ॐ शताक्ष्यै नमः पृष्ठवंशे ॥
ॐ शाकंभर्यै नमः भ्रुवोः ॥
ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शंखिनी चापिनी बाणभुशुण्डीपरिघायुधा शिरसि ॥
ॐ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च मुखे ॥

ॐ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरी कण्ठे ॥
ॐ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते ।
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् बाह्वोः ॥
ॐ खड्गशूलगदादीनि यानि चास्त्राणि तेम्बिके ।
करपल्लवसङ्गीनि तैरस्मान्रक्ष सर्वतः हृदये ॥
ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते उदरे ॥
ॐ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ।
पातु नः सर्वभूतेभ्यः कात्यायनि नमोऽस्तु ते नाभौ ॥
ॐ ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ऊर्वोः ॥
ॐ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ।
सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव जान्वोः ॥
ॐ असुरासृग्वसापंकचर्चितस्ते करोज्ज्वलः ।
शुभाय खड्गो भवतु चंडिके त्वां नता वयम् पादयोः ॥
॥ एवं न्यस्तशरीरः साधकः सच्चिदानंदरूपिणीं ध्यायेत् ॥

॥ अथ ध्यानम् ॥

विद्युद्दामसमप्रभां मृगपतिस्कंन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रधरालिखेटविशिखांश्चापं गुणं तर्जनीं ।
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥ १ ॥

॥ इति ध्यानम् ॥



॥ अथ प्रथमचरित्रम् ॥

प्रथमचरित्रस्य ब्रह्मा ऋषिः ॥ महाकाली देवता ॥ गायत्री छन्दः ॥ नन्दा शक्तिः ॥ रक्तदन्तिका बीजं ॥ अग्निस्तत्त्वं ॥ ऋग्वेदः स्वरूपं ॥ श्रीमहाकालीप्रीत्यर्थं प्रथमचरित्रजपे विनियोग ॥

खड्गं चक्रगदेषुचापपरिघान् शूलं भुशुण्डीं शिरः
शंखं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हंतुं मधुंकैटभम् ॥

॥ ॐ नमश्चण्डिकायै ॥

॥ ॐ ऐं मार्कण्डेय उवाच ॥ १ ॥

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ॥
निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥ २ ॥
महामायानुभावेन यथा मन्वंतराधिपः ॥
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥ ३ ॥

स्वारोचिषेंतरे पूर्वं चैत्रवंशसमुद्भवः ॥
सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले ॥ ४ ॥
तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान् ॥
बभूवुः शत्रवो भूपाः क्रोलाविध्वंसिनस्तदा ॥ ५ ॥
तस्य तैरभवद्युद्धमतिप्रबलदण्डिनः ॥
न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ॥ ६ ॥
ततः स्वपुरमायातो निजदेशाधिपोऽभवत् ॥
आक्रांतस्स महाभागस्तैस्तदा प्रबलारिभि ॥ ७ ॥
अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ॥
कोशो बलं चापहृतं तत्रापि स्वपुरे ततः ॥ ८ ॥
ततो मृगयाव्याजेन हृतस्वाम्यस्स भूपतिः ॥
एकाकी हयमारुह्य जगाम गहनं वनम् ॥ ९ ॥
स तत्राश्रममद्राक्षीद्विजवर्यस्य मेधसः ॥
प्रशांतः श्वापदाकीर्णं मुनिशिष्योपशोभितम् ॥ १० ॥
तस्थौ कञ्चित्स कालं च मुनिना तेन सत्कृतः ॥
इतश्चेतश्च विचरंस्तस्मिन् मुनिवराश्रमे ॥ ११ ॥
सोऽचिंतयत्तदा तत्र ममत्वाकृष्टमानसः ॥ १२ ॥
मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ॥

मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ॥ १३ ॥
न जाने स प्रधानो मे शूरो हस्ती सदामदः ॥
मम वैरिवशं यातः कान् भोगानुपलप्स्यते ॥ १४ ॥
ये ममानुगता नित्यं प्रसादधनभोजनैः ॥
अनुवृत्तिं ध्रुवं तेऽद्य कुर्वंत्यन्यमहीभृताम् ॥ १५ ॥
असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् ॥
संचितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति ॥ १६ ॥
एतच्चान्यच्च सततं चिंतयामास पार्थिवः ॥
तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः ॥ १७ ॥
स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः ॥
सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ॥ १८ ॥
इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् ॥
प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम् ॥ १९ ॥

॥ वैश्य उवाच ॥ २० ॥

समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ॥
पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ॥ २१ ॥
विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम् ॥
वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः ॥ २२ ॥

सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम् ॥
प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः ॥ २३ ॥
किं नु तेषां गृहे क्षेममक्षेमं किं नु सांप्रतम् ॥ २४ ॥
कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः ॥ २५ ॥

राजोवाच ॥ २६ ॥

यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः ॥ २७ ॥
तेषु किं भवतः स्नेहमनुबध्नाति मानसम् ॥ २८ ॥

॥ वैश्य उवाच ॥ २९ ॥

एवमेतद्यथा प्राह भवानस्मद्गतं वचः ॥
किं करोमि न बध्नाति मम निष्ठुरतां मनः ॥ ३० ॥
यैः संत्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ॥
पतिः स्वजनहार्दं च हार्दितेष्वेव मे मनः ॥ ३१ ॥
किमेतन्नाभिजानामि जानन्नपि महामते ॥
यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बंधुषु ॥ ३२ ॥
तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते ॥ ३३ ॥
करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम् ॥ ३४ ॥

॥ मार्कंडेय उवाच ॥ ३५ ॥

ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ॥ ३६ ॥
समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः ॥ ३७ ॥
कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम् ॥
उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥ ३८ ॥

॥ राजोवाच ॥ ३९ ॥

भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ॥ ४० ॥
दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ॥ ४१ ॥
ममत्वं गतराज्यस्य राज्यांगेष्वखिलेष्वपि ॥
जानतोपि यथाज्ञस्य किमेतन्मुनिसत्तम ॥ ४२ ॥
अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥
स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति ॥ ४३ ॥
एवमेष तथाहं च द्वावप्यत्यंतदुःखितौ ॥
दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ ॥ ४४ ॥
तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥
ममास्य च भवत्येषा विवेकांधस्य मूढता ॥ ४५ ॥

॥ ऋषिरुवाच ॥ ४६ ॥

ज्ञानमस्ति समस्तस्य जंतोर्विषयगोचरे ॥
विषयाश्च महाभाग यांति चैवं पृथक्पृथक् ॥ ४७ ॥
दिवांधाः प्राणिनः केचिद्रात्रावंधास्तथापरे ॥
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥ ४८ ॥
ज्ञानिनो मनुजाः सत्यं किं नु ते न हि केवलम् ॥
यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः ॥ ४९ ॥
ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् ॥
मनुष्याणां यत्तेषां तुल्यमन्यत्तथोभयोः ॥ ५० ॥
ज्ञानेऽपि सति पश्यैतान् पतंगाञ्छावचंचुषु ॥
कणमोक्षादृतान् मोहात्पीड्यमानानपि क्षुधा ॥ ५१ ॥
मानुषा मनुजव्याघ्रसाभिलाषाः सुतान् प्रति ॥
लोभात्प्रत्युपकाराय नन्वेतान् किं न पश्यसि ॥ ५२ ॥
तथापि ममतावर्ते मोहगर्ते निपातिताः ॥
महामायाप्रभावेण संसारस्थितिकारिणा ॥ ५३ ॥
तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः ॥
महामाया हरेश्चैषा तया संमोह्यते जगत् ॥ ५४ ॥
ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥

बलादाकृष्य मोहाय महामाया प्रयच्छति ॥ ५५ ॥
तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥
सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥ ५६ ॥
सा विद्या परमा मुक्तेर्हेतुभूतासनातनी ॥ ५७ ॥
संसारबंधहेतुश्च सैव सर्वेश्वरेश्वरी ॥ ५८ ॥

राजोवाच ॥ ५९ ॥

भगवन् का हि सा देवी महामायेति यां भवान् ॥
ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ॥ ६० ॥
यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥ ६१ ॥
तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ ६२ ॥

॥ ऋषिरुवाच ॥ ६३ ॥

नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ॥ ६४ ॥
तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ॥ ६५ ॥
देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ॥ ६६ ॥
योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ॥
आस्तीर्यशेषमभजत् कल्पांते भगवान् प्रभुः ॥ ६७ ॥

तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ॥
विष्णुकर्णमलोद्भूतौ हंतुं ब्रह्माणमुद्यतौ ॥ ६८ ॥
स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ॥
दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ॥ ६९ ॥
तुष्टाव योगनिद्रां तामेकाग्रहृदयः स्थितः ॥
विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ॥ ७० ॥
विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥ ७१ ॥

॥ ब्रह्मोवाच ॥ ७२ ॥

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥
सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ॥ ७३ ॥
अर्धमात्रा स्थिता नित्या यानुच्चार्याविशेषतः ॥
त्वमेव संध्या सावित्री त्वं देवि जननी परा ॥ ७४ ॥
त्वयैतद्धार्यते विश्वं त्वयैतत् सृज्यते जगत् ॥
त्वयैतत् पाल्यते देवि त्वमत्स्यंते च सर्वदा ॥ ७५ ॥
विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥
तथा संहृतिरूपांते जगतोऽस्य जगन्मये ॥ ७६ ॥

महाविद्या महामाया महामेधा महास्मृतिः ॥
महामोहा च भवती महादेवी महेश्वरी ॥ ७७ ॥
प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ॥
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥ ७८ ॥
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरेव च ॥ ७९ ॥
खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥
शंखिनी चापिनी बाणभुशुंडीपरिघायुधा ॥ ८० ॥
सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी ॥
परापराणां परमा त्वमेव परमेश्वरी ॥ ८१ ॥
यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ॥ ८२ ॥
यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥
सोपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ ८३ ॥
विष्णुः शरीरग्रहणमहमीशान एव च ॥
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥८४॥
सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥ ८५ ॥

प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥ ८६ ॥
बोधश्च क्रियतामस्य हंतुमेतौ महासुरौ ॥ ८७ ॥

॥ ऋषिरुवाच ॥ ८८ ॥

एवं स्तुता तदा देवी तामसी तत्र वेधसा ॥
विष्णोः प्रबोधनार्थाय निहंतुं मधुकैटभौ ॥ ८९ ॥
नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ॥
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ॥ ९० ॥
उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ॥
एकार्णवेऽहि शयनात्ततः स ददृशे च तौ ॥ ९१ ॥
मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ॥
क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ॥ ९२ ॥
समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः ॥
पंचवर्षसहस्राणि बाहुप्रहरणो विभुः ॥ ९३ ॥
तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ॥ ९४ ॥
उक्तवंतौ वरोस्मत्तो व्रियतामिति केशवम् ॥ ९५ ॥

॥ श्रीभगवानुवाच ॥ ९६ ॥

भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ॥ ९७ ॥
किमन्येन वरेणात्र एतावद्धि वृतं मया ॥ ९८ ॥

॥ ऋषिरुवाच ॥ ९९ ॥

वंचिताभ्यामिति तदा सर्वमापोमयं जगत् ॥
विलोक्य ताभ्यां गदितो भगवान् कमलेक्षणः ॥ १०० ॥
आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ॥ १०१ ॥

॥ ऋषिरुवाच ॥ १०२ ॥

तथेत्युक्त्वा भगवता शंखचक्रगदाभृता ॥
कृत्वा चक्रेण वैच्छिन्ने जघने शिरसी तयोः ॥ १०३ ॥
एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् ॥
प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते ॥ १०४ ॥

ॐ श्रीमार्कण्डेयपुराणे सावर्णिके
मन्वंतरे देवीमाहात्म्ये मधुकैटभवधो
नाम प्रथमः ॥ १ ॥

———

॥ अथ मध्यमचरितम् ॥

ॐ मध्यमचरितस्य । विष्णुर्ऋषिः । महालक्ष्मीर्देवता । उष्णिक्छंदः । शाकंभरी शक्तिः । दुर्गा बीजं । वायुस्तत्त्वं । यजुर्वेदः स्वरूपं ॥ महालक्ष्मीप्रीत्यर्थं मध्यमचरितजपे विनियोगः ॥

ॐअक्षस्रक्परशुं गदेषु कुलिशं पद्मं धनुः कुण्डिकां
दंडं शक्तिमसिं च चर्म जलजं घंटां सुराभाजनम् ॥
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननां
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥

ॐ ऋषिरुवाच ॥ १ ॥

देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा ॥
महिषेसुराणामधिपे देवानां च पुरंदरे ॥ २ ॥
तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् ॥
जित्वा च सकलान् देवान्निद्रोभून्महिषासुरः ॥ ३ ॥

ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् ॥
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ॥ ४ ॥
यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् ॥
त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ॥ ५ ॥
सूर्येन्द्राग्न्यनिलेंदूनां यमस्य वरुणस्यच ॥
अन्येषां चाधिकारान्सः स्वयमेवाधितिष्ठति ॥ ६ ॥
स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ॥
विचरंति यथा मर्त्या महिषेण दुरात्मना ॥ ७ ॥
एतद्वः कथितं सर्वममरारिविचेष्टितम् ॥
शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिंत्यताम् ॥ ८ ॥
इत्थं निशम्य देवानां वचांसि मधुसूदनः ॥
चकार कोपं शंभुश्च भृकुटीकुटिलाननौ ॥ ९ ॥
ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः ॥
निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च ॥ १० ॥
अन्येषां चैव देवानां शक्रादीनां शरीरतः ॥
निर्गतं सुमहत्तेज़स्तच्चैक्यं समगच्छत ॥ ११ ॥
अतीव तेजसः कूटं ज्वलंतमिव पर्वतम् ॥
ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगंतरम् ॥ १२ ॥

अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् ॥
एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा ॥ १३ ॥
यदभूच्छांभवं तेजस्तेनाजायत तन्मुखम् ॥
याम्येन चाभवन् केशा बाहवो विष्णुतेजसा ॥ १४ ॥
सौम्येन स्तनयोर्युग्मं मध्यं चैंद्रेण चाभवत् ॥
वारुणेन च जंघोरू नितम्बस्तेजसा भुवः ॥ १५ ॥
ब्रह्मणस्तेजसा पादौ तदंगुल्योऽर्कतेजसा ॥
वसूनां च करांगुल्यः कौबेरेण च नासिका ॥ १६ ॥
तस्यास्तु दंतास्संभूताः प्राजापत्येन तेजसा ॥
नयनत्रितयं जज्ञे तथा पावकतेजसा ॥ १७ ॥
भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य च ॥
अन्येषां चैव देवानां संभवस्तेजसां शिवा ॥ १८ ॥
ततः समस्तदेवानां तेजोराशिसमुद्भवाम् ॥
तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः ॥ १९ ॥
शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक् ॥
चक्रं च दत्तवान् कृष्णः समुत्पाट्य स्वचक्रतः ॥ २० ॥
शङ्खं च वरुणः शक्तिं ददौ तस्यै हुताशनः ॥
मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी ॥ २१ ॥

वज्रमिन्द्रः समुत्पाट्य कुलिशादमराधिपः ॥
ददौ तस्यै सहस्राक्षो घण्टामैरावताद्गजात् ॥ २२ ॥
कालदण्डाद्यमो दण्डं पाशं चाम्बुपतिर्ददौ ॥
प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम् ॥ २३ ॥
समस्तरोमकूपेषु निजरश्मीन् दिवाकरः ॥
कालश्च दत्तवान् खड्गं तस्याश्चर्म च निर्मलम् ॥ २४ ॥
क्षीरोदश्चामलं हारमजरे च तथाम्बरे ॥
चूडामणिं तथा दिव्यं कुण्डले कटकानि च ॥ २५ ॥
अर्धचन्द्रं तथा शुभ्रं केयूरान् सर्वबाहुषु ॥
नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम् ॥ २६ ॥
अंगुलीयकरत्नानि समस्तास्वंगुलीषु च ॥
विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम् ॥ २७ ॥
अस्त्राण्यनेकरूपाणि तथाऽभेद्यं च दंशनम् ॥
अम्लानपङ्कजां मालां शिरस्युरसि चापराम् ॥ २८ ॥
अददज्जलधिस्तस्यै पङ्कजं चातिशोभनम् ॥
हिमवान् वाहनं सिंहं रत्नानि विविधानि च ॥ २९ ॥
ददावशून्यं सुरया पानपात्रं धनाधिपः ॥
शेषश्च सर्वनागेशो महामणिविभूषितम् ॥ ३० ॥

नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ॥
अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥ ३१ ॥
सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ॥
तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥ ३२ ॥
अमायतातिमहता प्रतिशब्दो महानभूत् ॥
चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे ॥ ३३ ॥
चचाल वसुधा चेलुः सकलाश्च महीधराः ॥
जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीम् ॥ ३४ ॥
तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ॥
दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥ ३५ ॥
सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ॥
आः किमेतदिति क्रोधादाभाष्य महिषासुरः ॥ ३६ ॥
अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ॥
स ददर्श ततो देवीं व्याप्तलोकत्रयीं त्विषा ॥ ३७ ॥
पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् ॥
क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेनताम् ॥ ३८ ॥
दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थिताम् ॥
ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ॥ ३९ ॥

शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरम् ॥
महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ॥ ४० ॥
युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः ॥
रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ॥ ४१ ॥
अयुध्यतायुतानां च सहस्रेण महाहनुः ॥
पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः ॥ ४२ ॥
अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ॥
गजवाजिसहस्रौघैरनेकैः परिवारितः ॥ ४३ ॥
वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ॥
बिडालाख्योऽयुतानां च पञ्चाशद्भिरथायुतैः ॥ ४४ ॥
युयुधे संयुगे तत्र रथानां परिवारितः ॥
अन्ये च तत्रायुतशो रथनागहयैर्वृताः ॥ ४५ ॥
युयुधुः संयुगे देव्या सह तत्र महासुराः ॥
कोटिकोटिसहस्रैस्तु रथानां दन्तिना तथा ॥ ४६ ॥
हयानां च वृतो युद्धे तत्राभून्महिषासुरः ॥
तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ॥ ४७ ॥
युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ॥
केचिच्च चिक्षिपुः शक्तीः केचित् पाशांस्तथापरे ॥ ४८ ॥

देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ॥
सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ॥ ४९ ॥
लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ॥
अनायस्तानना देवी स्तूयमाना सुरर्षिभिः ॥ ५० ॥
मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ॥
सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ॥ ५१ ॥
चचारासुरसैन्येषु वनेष्विव हुताशनः ॥
निःश्वासान् मुमुचे यांश्च युध्यमाना रणेऽम्बिका॥ ५२ ॥
त एव सद्यस्संभूता गणाः शतसहस्रशः ॥
युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः ॥ ५३ ॥
नाशयन्तो सुरगणान् देवी शक्त्युपबृंहिताः ॥
अवादयन्त पटहान् गणाः शंखांस्तथापरे ॥ ५४ ॥
मृदङ्गांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ॥
ततो देवी त्रिशूलेन गदया शक्तिऋष्टिभिः ॥ ५५ ॥
खड्गादिभिश्च शतशो निजघान महासुरान् ॥
पातयामास चैवान्यान् घण्टास्वनविमोहितान् ॥ ५६ ॥
असुरान् भुवि पाशेन बद्ध्वा चान्यानकर्षयत् ॥
केचिद् द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥ ५७ ॥

विपोथिता निपातेन गदया भुवि शेरते ॥
वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ॥ ५८ ॥
केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि ॥
निरंतराः शरौघेण कृताः केचिद्रणाजिरे ॥ ५९ ॥
सेनानुकारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः ॥
केषांचिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ॥ ६० ॥
शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ॥
विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महासुराः ॥ ६१ ॥
एकबाह्वक्षिचरणाः केचिद्देव्या द्विधाकृताः ॥
छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ॥ ६२ ॥
कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः ॥
ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ॥ ६३ ॥
कबंधाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ॥
तिष्ठ तिष्ठेति भाषंतो देवीमन्ये महासुराः ॥ ६४ ॥
पातितैै रथनागाश्वैरसुरैश्च वसुन्धरा ॥
अगम्या साऽभवत्तत्र यत्राभूत् स महारणः ॥ ६५ ॥
शोणितौघा महानद्यस्तत्र विसुस्रुवुः ॥
मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥ ६६ ॥

क्षणेन तन्महासैन्यमसुराणां तथांबिका ॥
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम् ॥ ६७ ॥
स च सिंहो महानादमुत्सृजन् धुतकेसरः ॥
शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥ ६८ ॥
देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः ॥
यथैषां तुष्टुवुर्देवाः पुष्पवृष्टिमुचो दिवि ॥ ६९ ॥

श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये
महिषासुरसैन्यवधो नाम द्वितीयः ॥ २ ॥

—(×:०:×)—

॥ अथ तृतीयोऽध्यायः ॥

ऋषिरुवाच ॥ १ ॥

निहन्यमानं तत्सैन्यमवलोक्य महासुरः ॥
सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकाम् ॥ २ ॥
स देवीं शरवर्षेण ववर्ष समरेऽसुरः ॥
यथा मेरुगिरेः शृङ्गं तोयवर्षेण तोयदः ॥ ३ ॥
तस्य छित्त्वा ततो देवी लीलयैव शरोत्करान् ॥
जघान तुरगान्बाणैर्यंतारं चैव वाजिनाम् ॥ ४ ॥
चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् ॥
विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ॥ ५ ॥
सच्छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥
अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः ॥ ६ ॥
सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि ॥
आजघान भुजे सव्ये देवीमप्यतिवेगवान् ॥ ७ ॥
तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन ॥
ततो जग्राह शूलं स कोपादरुणलोचनः ॥ ८ ॥

चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ॥
जाज्वल्यमानं तेजोभी रविबिंबमिवांबरात् ॥ ९ ॥
दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत ॥
तच्छूलं शतधा तेन नीतं स च महासुरः ॥ १० ॥
हते तस्मिन्महावीर्ये महिषस्य चमूपतौ ॥
आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥ ११ ॥
सोऽपि शक्तिं मुमोचाथ देव्यास्तामंबिका द्रुतम् ॥
हुंकाराभिहतां भूमौ पातयामास निष्प्रभाम् ॥ १२ ॥
भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ॥
चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ॥ १३ ॥
ततः सिंहः समुत्पत्य गजकुंभांतरे स्थितः ॥
बाहुयुद्धेन युयुधे तेनाच्चैस्त्रिदशारिणा ॥ १४ ॥
युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ ॥
युयुधातेतिसंरब्धौ प्रहारैरतिदारुणैः ॥ १५ ॥
ततो वेगात् खमुत्पत्य निपत्य च मृगारिणा ॥
करप्रहारेण शिरश्चामरस्य पृथक्कृतम् ॥ १६ ॥
उदग्रश्चरणे देव्या शिलावृक्षादिभिर्हतः ॥
दन्तमुष्टितलैश्चैव करालश्च निपातितः ॥ १७ ॥

देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् ॥
बाष्कलं भिंदिपालेन बाणैस्ताम्रं तथांधकम् ॥ १८ ॥
उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम् ॥
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥ १९ ॥
बिडालस्यासिना कायात् पातयामास वै शिरः ॥
दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ॥ २० ॥
एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः ॥
माहिषेण स्वरूपेण त्रासयामास तान् गणान् ॥ २१ ॥
कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथापरान् ॥
लांगूलताडितांश्चान्यान् शृङ्गाभ्यां च विदारितान् ॥ २२ ॥
वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ॥
निःश्वासपवनेनान्यान्पातयामास भूतले ॥ २३ ॥
निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ॥
सिंहं हंतुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥ २४ ॥
सोऽपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः ॥
शृङ्गाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च ॥ २५ ॥
वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ॥
लांगूलेनाहतश्चाब्धिः प्लावयामास सर्वतः ॥ २६ ॥

धुतशृङ्गविभिन्नाश्च खण्डं खण्डं ययुर्घनाः ॥
श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः ॥ २७ ॥
इति क्रोधसमाध्मातमापतंतं महासुरम् ॥
दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाऽकरोत् ॥ २८ ॥
सा क्षिप्त्वा तस्य वै पाशं तं बबंध महासुरम् ॥
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥ २९ ॥
ततः सिंहोऽभवत्सद्यो यावत्तस्यांबिका शिरः ॥
छिनत्ति तावत् पुरुषः खड्गपाणिरदृश्यत ॥ ३० ॥
तत एवाशु पुरुषं देवी चिच्छेद सायकैः ॥
तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः ॥ ३१ ॥
करेण च महासिंहं तं चकर्ष जगर्ज च ॥
कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥ ३२ ॥
ततो महासुरो भूयो माहिषं वपुरास्थितः ॥
तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ॥ ३३ ॥
ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ॥
पपौ पुनः पुनश्चैव जहासारुणलोचना ॥ ३४ ॥
ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः ॥
विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ॥ ३५ ॥

सा च तान्प्रहितांस्तेन चूर्णयंती शरोत्करैः ॥
उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ॥ ३६ ॥

॥ देव्युवाच ॥ ३७ ॥

गर्ज गर्ज क्षणं मूढ़ मधु यावत्पिबाम्यहम् ॥
मया त्वयि हतेऽत्रैव गर्जिष्यंत्याशु देवताः ॥ ३८ ॥

॥ ऋषिरुवाच ॥ ३९ ॥

एवमुक्त्वा समुत्पत्य साऽऽरूढा तं महासुरम् ॥
पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत् ॥ ४० ॥
ततः सोऽपि पादाक्रांतस्तया निजमुखात्ततः ॥
अर्धनिष्क्रांत एवासीद्देव्या वीर्येण संवृतः ॥ ४१ ॥
अर्धनिष्क्रांत एवासौ युध्यमानो महासुरः ॥
तया महासिना देव्या शिरच्छित्त्वा निपातितः ॥ ४२ ॥
ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ॥
प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥ ४३ ॥
तुष्टुवुस्तां सुरा देवीं सहदिव्यैर्महर्षिभिः ॥
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४४ ॥

श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये
महिषासुरवधो नाम तृतीयोऽध्यायः ॥ ३ ॥

॥ अथ चतुर्थोऽध्यायः ॥



ऋषिरुवाच ॥ १ ॥

शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन्दुरात्मनि सुरारिबले च देव्या ॥
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥ २ ॥

देव्या यया ततमिदं जगदात्मशक्त्या
निःशेषदेवगणशक्तिसमूहमूर्त्या ॥
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥ ३ ॥

यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च ॥
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ॥ ४ ॥

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ॥
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥ ५ ॥
किं वर्णयाम तव रूपमचिंत्यमेतत्किं
चातिवीर्यमसुरक्षयकारि भूरि ॥
किं चाहवेषु चरितानि तवाति यानि
सर्वेषु देव्यसुरदेवगणादिकेषु ॥ ६ ॥
हेतुः समस्तजगतां त्रिगुणापि दोषैर्न
ज्ञायसे हरिहरादिभिरप्यपारा ॥
सर्वाश्रयाखिलमिदं जगदंशभूत-
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ ७ ॥
यस्याः समस्तसुरता समुदीरणेन
तृप्तिं प्रयाति सकलेषु मखेषु देवी ॥
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः स्वधा च ॥ ८ ॥
या मुक्तिहेतुरविचिन्त्यमहाव्रता
त्वमभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ॥

मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्याऽसि सा भगवती परमा हि देवि ॥ ९ ॥
शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम् ॥
देवी त्रयी भगवती भवभावनाय
वार्ता च सर्वजगतां परमार्तिहंत्री ॥ १० ॥
मेधाऽसि देवि विदिताखिलशास्त्रसारा
दुर्गाऽसि दुर्गभवसागरनौरसङ्गा ॥
श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥ ११ ॥
ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ॥
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥ १२ ॥
दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-
मुद्यच्छशांकसदृशच्छवि यन्न सद्यः ॥
प्राणान् मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितांतकदर्शनेन ॥ १३ ॥

देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि ॥
विज्ञातमेतदधुनैव यदस्तमेतन्नीतं
बलं सुविपुलं महिषासुरस्य ॥ १४ ॥
ते संमता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः ॥
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥ १५ ॥
धर्म्याणि देवि सकलानि सदैव
कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति ॥
स्वर्गं प्रयाति च ततो भवती प्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥ १६ ॥
दुर्गे स्मृता हरसि भीतिमशेषजंतोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ॥
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ॥ १७ ॥
एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वंतु नाम नरकाय चिराय पापम् ॥

संग्राममृत्युमधिगम्य दिवं प्रयांतु
मत्वेति नूनमहितान्विनिहंसि देवि ॥ १८ ॥
दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ॥
लोकान्प्रयांतु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वहितेषु साध्वी ॥ १९ ॥
खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकांतिनिवहेन दृशोऽसुराणाम् ॥
यन्नागता विलयमंशुमदिंदुखण्ड-
योग्याननं तव विलोकयतां तदेतत् ॥ २० ॥
दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिंत्यमतुल्यमन्यैः ॥
वीर्यं च हंतृ हृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥ २१ ॥
केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र ॥
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥ २२ ॥

त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ॥
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं नमस्ते ॥ २३ ॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥
घण्टास्वनेन नः पाहि चापज्यानिस्स्वनेन च ॥ २४ ॥
प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ २५ ॥
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ॥
यानि चात्यंतघोराणि तै रक्षास्मांस्तथा भुवम् ॥ २६ ॥
खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ॥
करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः ॥ २७ ॥

ऋषिरुवाच ॥ २८ ॥

एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ॥
अर्चिता जगतां धात्री तथागंधानुलेपनैः ॥ २९ ॥
भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैः सुधूपिता ॥
प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् ॥ ३० ॥

देव्युवाच ॥ ३१ ॥

ब्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवांछितम् ॥ ३२ ॥

देवा ऊचुः ॥ ३३ ॥

भगवत्या कृतं सर्वं न किंचिदवशिष्यते ॥
यदयं निहतः शत्रुरस्माकंमहिषासुरः ॥ ३४ ॥
यदि चापि वरो देयस्त्वयाऽस्माकं महेश्वरि ॥
संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ॥ ३५ ॥
यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥
तस्य वित्तर्द्धिविभवैर्धनदारादि संपदाम् ॥ ३६ ॥
वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ॥ ३७ ॥

ऋषिरुवाच ॥ ३८ ॥

इति प्रसादिता देवैर्जगतोर्थे तथात्मनः ॥
तथेत्युक्त्वा भद्रकाली बभूवांतर्हिता नृप ॥ ३९ ॥
इत्येतत्कथितं भूप संभूता सा यथा पुरा ॥
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ ४० ॥
पुनश्च गौरीदेहात्सा समुद्भूता यथा भवत् ॥
वधाय दुष्टदैत्यानां तथा शुम्भनिशुंभयोः ॥ ४१ ॥

रक्षणाय च लोकानां देवानामुपकारिणी ॥
तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ॥ ४२ ॥
ॐ श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये
शक्रादिस्तुतिर्नाम चतुर्थः ॥ ४ ॥



॥ अथ उत्तमचंरितम् ॥

ॐ उत्तमचरितस्य रुद्र ऋषिः ॥ महासरस्वती देवता ॥ अनुष्टुप् छंदः ॥ भीमा शक्तिः ॥ भ्रामरी बीजम् ॥ सूर्यस्तत्त्वम् ॥ सामवेदः स्वरूपम् ॥ महासरस्वतीप्रीत्यर्थमुत्तमचरितजपे विनियोगः ॥

॥ अथ ध्यानम् ॥

घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम् ॥
गौरीदेहसमुद्भवां त्रिनयनामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि दैत्यार्दिनीम् ॥

ॐ ऋषिरुवाच ॥ १ ॥

पुरा शुंभनिशुंभाभ्यामसुराभ्यां शचीपतेः ॥
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥ २ ॥
तावेव सूर्यतां तद्वदधिकारं तथैन्दवम् ॥
कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥ ३ ॥

तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च ॥
ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥ ४ ॥
हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः ॥
महासुराभ्यां तां देवीं संस्मरंत्यपराजिताम् ॥ ५ ॥
तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः ॥
भवतां नाशयिष्यामि तत्क्षणात्परमापदः ॥ ६ ॥
इति कृत्वा मतिं देवा हिमवंतं नगेश्वरम् ॥
जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥ ७ ॥

देवा ऊचुः ॥ ८ ॥

नमो देव्यै महादेव्यै शिवायै सततं नमः ॥
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ ९ ॥
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ॥
ज्योत्स्नायै चेंदुरूपिण्यै सुखायै सततं नमः ॥ १० ॥
कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कूर्म्यै नमो नमः ॥
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥ ११ ॥
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ॥
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ १२ ॥

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ॥
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमोनमः ॥ १३ ॥
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ॥
नमस्तस्यै ॥१४॥ नमस्तस्यै ॥१५॥ नमस्तस्यै नमो नमः ॥१६॥
या देवी सर्वभूतेषु चेतनेत्यभिधीयते ॥
नमस्तस्यै ॥१७॥ नमस्तस्यै ॥१८॥ नमस्तस्यै नमो नमः ॥१९॥
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ॥
नमस्तस्यै ॥२०॥ नमस्तस्यै ॥२१॥ नमस्तस्यै नमो नमः ॥२२॥
या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ॥
नमस्तस्यै ॥२३॥ नमस्तस्यै ॥२४॥ नमस्तस्यै नमो नमः ॥२५॥
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ॥
नमस्तस्यै ॥२६॥ नमस्तस्यै ॥२७॥ नमस्तस्यै नमो नमः ॥ २८ ॥
या देवी सर्वभूतेषु छायारूपेण संस्थिता ॥
नमस्तस्यै ॥२९॥ नमस्तस्यै ॥३०॥ नमस्तस्यै नमो नमः ॥३१॥
या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ॥
नमस्तस्यै ॥३२॥ नमस्तस्यै ॥३३॥ नमस्तस्यै नमो नमः ॥३४॥
या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ॥
नमस्तस्यै ॥३५॥ नमस्तस्यै ॥३६॥ नमस्तस्यै नमो नमः ॥३७॥

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ॥
नमस्तस्यै ॥३८॥ नमस्तस्यै ॥३९॥ नमस्तस्यै नमो नमः ॥४०॥
या देवी सर्वभूतेषु जातिरूपेण संस्थिता ॥
नमस्तस्यै ॥४१॥ नमस्तस्यै ॥४२॥ नमस्तस्यै नमो नमः ॥४३॥
या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ॥
नमस्तस्यै ॥४४॥ नमस्तस्यै ॥४५॥ नमस्तस्यै नमो नमः ॥४६॥
या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ॥
नमस्तस्यै ॥४७॥ नमस्तस्यै ॥४८॥ नमस्तस्यै नमो नमः ॥४९॥
या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ॥
नमस्तस्यै ॥५०॥ नमस्तस्यै ॥५१॥ नमस्तस्यै नमो नमः ॥५२॥
या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ॥
नमस्तस्यै ॥५३॥ नमस्तस्यै ॥५४॥ नमस्तस्यै नमो नमः ॥५५॥
या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ॥
नमस्तस्यै ॥५६॥ नमस्तस्यै ॥५७॥ नमस्तस्यै नमो नमः ॥५८॥
या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ॥
नमस्तस्यै ॥५९॥ नमस्तस्यै ॥६०॥ नमस्तस्यै नमो नमः ॥६१॥
या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ॥
नमस्तस्यै ॥६२॥ नमस्तस्यै ॥६३॥ नमस्तस्यै नमो नमः ॥६४॥

या देवी सर्वभूतेषु दयारूपेण संस्थिता ॥
नमस्तस्यै ॥६५॥ नमस्तस्यै ॥६६॥ नमस्तस्यै नमो नमः ॥६७॥

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ॥
नमस्तस्यै ॥६८॥ नमस्तस्यै ॥६९॥ नमस्तस्यै नमो नमः ॥७०॥

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ॥
नमस्तस्यै ॥७१॥ नमस्तस्यै ॥७२॥ नमस्तस्यै नमो नमः ॥७३॥

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ॥
नमस्तस्यै ॥७४॥ नमस्तस्यै ॥७५॥ नमस्तस्यै नमो नमः ॥७६॥

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ॥
भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ॥ ७७ ॥

चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ॥
नमस्तस्यै ॥७८॥ नमस्तस्यै ॥७९॥ नमस्तस्यै नमो नमः ॥८०॥

स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा
सुरेन्द्रेण दिनेषु सेविता ॥

करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥ ८१ ॥

या सांप्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते ॥
या च स्मृता तत्क्षणमेव हन्ति
नः सर्वापदो भक्तिविनम्रमूर्तिभिः ॥ ८२ ॥

ऋषिरुवाच ॥ ८३ ॥

एवं स्तवादियुक्तानां देवानां तत्र पार्वती ॥
स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ॥ ८४ ॥
साऽब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिः स्तूयतेऽत्र का ॥
शरीरकोशतश्चास्याः समुद्भूताऽब्रवीच्छिवा ॥ ८५ ॥
स्तोत्रं ममैतत्क्रियते शुम्भदैत्यनिराकृतैः ॥
देवैः समस्तैः समरे निशुम्भेन पराजितैः ॥ ८६ ॥
शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका ॥
कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥ ८७ ॥
तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती ॥
कालिकेति समाख्याता हिमाचल कृताश्रया ॥ ८८ ॥
ततोम्बिका परं रूपं बिभ्राणां सुमनोहरम् ॥
ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुंभयोः ॥ ८९ ॥

ताभ्यां शुम्भाय चाख्याता साऽतीव सुमनोहरा॥
काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम् ॥ ९० ॥
नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमम् ॥
ज्ञायतां काप्यसौदेवी गृह्यतां चासुरेश्वर ॥ ९१ ॥
स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा ॥
सा तु तिष्ठति दैत्येन्द्र तां भवान् द्रष्टुमर्हति ॥ ९२ ॥
यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ॥
त्रैलोक्ये तु समस्तानि सांप्रतं भान्ति ते गृहे ॥ ९३ ॥
ऐरावतः समानीतो गजरत्नं पुरंदरात् ॥
पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ॥ ९४ ॥
विमानं हंससंयुक्तमेतत्तिष्ठति तेऽङ्गणे ॥
रत्नभूतमिहानीतं यदासीद्वेधसोद्भुतम् ॥ ९५ ॥
निधिरेष महापद्मः समानीतो धनेश्वरात् ॥
किंजल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजाम् ॥ ९६ ॥
छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति ॥
तथाऽयं स्यन्दनवरो यः पुरासीत्प्रजापतेः ॥ ९७ ॥
मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता ॥
पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥ ९८ ॥

निशुंभस्याब्धिजाताश्च समस्ता रत्नजातयः ॥
वह्निश्चापि ददौ तुभ्यमग्निशौचे च वाससी ॥ ९९ ॥
एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते ॥
स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ॥ १०० ॥

ऋषिरुवाच ॥ १०१ ॥

निशम्येति वचः शुंभः स तदा चण्डमुण्डयोः ॥
प्रेषयामास सुग्रीवं दूतं देव्या महासुरम् ॥ १०२ ॥
इति चेति च वक्तव्या सा गत्वा वचनान्मम ॥
यथा चाभ्येति संप्रीत्या तथा कार्यं त्वया लघु ॥ १०३ ॥
स तत्र गत्वा यत्रास्ते शैलोद्देशेतिशोभने ॥
सा देवी तां ततः प्राह श्लक्ष्णं मधुरया गिरा ॥ १०४ ॥

दूत उवाच ॥ १०५ ॥

देवि दैत्येश्वरः शुंभस्त्रैलोक्ये परमेश्वरः ॥
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥ १०६ ॥
अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ॥
निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ॥ १०७ ॥
मम त्रैलोक्यमखिलं मम देवा वशानुगाः ॥
यज्ञभागानहं सर्वानुपश्नामि पृथक् पृथक् ॥ १०८ ॥

त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ॥
तथैव गजरत्नं च हृतं देवेन्द्रवाहनम् ॥ १०९ ॥
क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ॥
उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ॥ ११० ॥
यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च ॥
रत्नभूतानि भूतानि तानि मय्येव शोभने ॥ १११ ॥
स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ॥
सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥ ११२ ॥
मां वा ममानुजं वापि निशुंभमुरुविक्रमम् ॥
भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः ॥ ११३ ॥
परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ॥
एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥ ११४ ॥

ऋषिरुवाच ॥ ११५ ॥

इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ ॥
दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥ ११६ ॥

देव्युवाच ॥ ११७ ॥

सत्यमुक्तं त्वया नात्र मिथ्या किञ्चित्त्वयोदितम् ॥
त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि तादृशः ॥ ११८ ॥

किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् ॥
श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ॥ ११९ ॥
यो मां जयति संग्रामे यो मे दर्पं व्यपोहति ॥
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ॥ १२० ॥
तदागच्छतु शुम्भोऽत्र निशुंभो वा महासुरः ॥
मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ॥ १२१ ॥

दूत उवाच ॥ १२२ ॥

अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः ॥
त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुंभनिशुंभयोः ॥ १२३ ॥
अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ॥
तिष्ठन्ति संमुखे देवि किं पुनः स्त्री त्वमेकिका ॥ १२४ ॥
इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ॥
शुंभादीनां कथं तेषां स्त्री प्रयास्यसि संमुखम् ॥ १२५ ॥
सा त्वं गच्छ मयैवोक्ता पार्श्वं शुंभनिशुम्भयोः ॥
केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ॥ १२६ ॥

देव्युवाच ॥ १२७ ॥

एवमेतद्बली शुंभो निशुम्भश्चातिवीर्यवान् ॥
किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥ १२८ ॥

स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः ॥
तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु यत् ॥ १२६ ॥
श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये
देव्या दूतसंवादो नाम पञ्चमः ॥ ५ ॥

—(×:०:×)—



॥ अथ षष्ठोऽध्यायः ॥

ऋषिरुवाच ॥ १ ॥

इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ॥
समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥ २ ॥
तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ॥
सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् ॥ ३ ॥
हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ॥
तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम् ॥ ४ ॥
तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठते परः ॥
स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा ॥ ५ ॥

ऋषिरुवाच ॥ ६ ॥

तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ॥
वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥ ७ ॥
स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् ॥
जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ॥ ८ ॥

न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ॥
ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥ ९ ॥

देव्युवाच ॥ १० ॥

दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः ॥
बलान्नयसि मामेवं ततः किं ते करोम्यहम् ॥ ११ ॥

ऋषिरुवाच ॥ १२ ॥

इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ॥
हुंकारेणैव तं भस्म सा चकाराम्बिका ततः ॥ १३ ॥
अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका ॥
ववर्ष सायकैस्तीक्ष्णैस्तथाशक्तिपरश्वधैः ॥ १४ ॥
ततो धुतसटः कोपात्कृत्वा नादं सुभैरवम् ॥
पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥ १५ ॥
कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् ॥
आक्रान्त्या चाधरेणान्यान् स जघान महासुरान् ॥ १६ ॥
केषांचित्पाटयामास नखैः कोष्ठानि केसरी ॥
तथा तलप्रहारेण शिरांसि कृतवान्पृथक् ॥ १७ ॥
विच्छिन्नबाहुशिरसः कृतास्तेन तथा परे ॥
पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥ १८ ॥

क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ॥
तेन केसरिणा देव्या वाहनेनातिकोपिना ॥ १९ ॥
श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् ॥
बलं च क्षयितं कृत्स्नं देवी केसरिणा ततः ॥ २० ॥
चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः ॥
आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ॥ २१ ॥
हे चण्ड हे मुण्ड बलैर्बहुभिः परिवारितौ ॥
तत्र गच्छत गत्वा च सा समानीयतां लघु ॥ २२ ॥
केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि ॥
तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥ २३ ॥
तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ॥
शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथाम्बिकाम् ॥ २४ ॥

श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
धूम्रलोचनवधो नाम षष्ठः ॥ ६ ॥

—:(०):—

॥ अथ सप्तमोऽध्यायः ॥

ऋषिरुवाच ॥ १ ॥

आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः ॥
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः ॥ २ ॥
ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् ॥
सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने ॥ ३ ॥
ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ॥
आकृष्टचापासिधरास्तथाऽन्ये तत्समीपगाः ॥ ४ ॥
ततः कोपं चकारोच्चैरम्बिका तानरीन्प्रति ॥
कोपेन चास्या वदनं मषीवर्णमभूत्तदा ॥ ५ ॥
भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ॥
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥ ६ ॥
विचित्रखट्वाङ्गधरा नरमालाविभूषणा ॥
द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ॥ ७ ॥

अतिविस्तारवदना जिह्वाललनभीषणा ॥
निमग्ना रक्तनयना नादापूरितदिङ्मुखा ॥ ८ ॥
सा वेगेनाभिपतिता घातयन्ती महासुरान् ॥
सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ॥ ९ ॥
पार्ष्णिग्राहांकुशग्राहयोधघण्टासमन्विताम् ॥
समादायैकहस्तेन मुखे चिक्षेप वारणान् ॥ १० ॥
तथैव योधं तुरगै रथं सारथिना सह ॥
निक्षिप्य वक्त्रे दशनैश्चर्वयन्त्यतिभैरवम् ॥ ११ ॥
एकं जग्राह केशेषु ग्रीवायामथ चापरम् ॥
पादेनाक्रम्य चैवान्यमुरसाऽन्यमपोथयत् ॥ १२ ॥
तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः ॥
मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥ १३ ॥
बलिनां तद्बलं सर्वमसुराणां निपातितम् ॥
ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा ॥ १४ ॥
असिना निहताः केचित्केचित्खट्वाङ्गताडिताः ॥
जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा ॥ १५ ॥
क्षणेन तद्बलं सर्वमसुराणां निपातितम् ॥
दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम् ॥ १६ ॥

शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ॥
छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥ १७ ॥

तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ॥
बभुर्यथाऽर्कबिम्बानि सुबहूनि घनोदरम् ॥ १८ ॥

ततो जहासातिरुषा भीमं भैरवनादिनी ॥
काली करालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला ॥ १९ ॥

उत्थाय च महासिंहं देवी चण्डमधावत ॥
गृहीत्वा चास्य केशेषु शिरस्तेनासिनाऽच्छिनत् ॥ २० ॥

अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् ॥
तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा ॥ २१ ॥

हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् ॥
मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥ २२ ॥

शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च ॥
प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम् ॥ २३ ॥

मया तवात्रोपहृतौ चण्डमुण्डौ महापशू ॥
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि ॥ २४ ॥

ऋषिरुवाच ॥ २५ ॥

तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ ॥
उवाच कालीं कल्याणी ललितं चण्डिका वचः ॥ २६ ॥

यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ॥
चामुण्डेति ततो लोके ख्याता देवी भविष्यसि ॥ २७ ॥

श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
चण्डमुण्डवधो नाम सप्तमः ॥ ७ ॥

——:०:——

॥ अथ अष्टमोऽध्यायः ॥



ऋषिरुवाच ॥ १ ॥

चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ॥
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥ २ ॥
ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ॥
उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥ ३ ॥
अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ॥
कम्बूनां चतुराशीतिर्निर्यान्तु स्वबलैर्वृताः ॥ ४ ॥
कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै ॥
शतं कुलानि धूम्राणां निर्गच्छन्तु ममाज्ञया ॥ ५ ॥
कालका दौर्हृदा मौर्याः कालिकेयास्तथासुराः ॥
युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ॥ ६ ॥
इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ॥
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ॥ ७ ॥

आयांतं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ॥
ज्यास्वनैः पूरयामास धरणीगगनान्तरम् ॥ ८ ॥
ततः सिंहो महानादमतीव कृतवान्नृप ॥
घण्टास्वनेन तान्नादानम्बिका चोपबृंहयत् ॥ ९ ॥
धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ॥
निनादैर्भीषणैः काली जिग्ये विस्तारिताननना ॥ १० ॥
तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ॥
देवी सिंहस्तथा काली शरौघैः परिवारिताः ॥ ११ ॥
एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् ॥
भवायामरसिंहानामतिवीर्यबलान्विताः ॥ १२ ॥
ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ॥
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥ १३ ॥
यस्य देवस्य यद्रूपं यथा भूषणवाहनम् ॥
तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ ॥ १४ ॥
हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ॥
आयाता ब्रह्मणः शक्तिर्ब्रह्माणीत्यभिधीयते ॥ १५ ॥
माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ॥
महाहिवलयाप्रासा चन्द्ररेखाविभूषणा ॥ १६ ॥

कौमारी शक्तिहस्ता च मयूरवरवाहना ॥
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥ १७ ॥
तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ॥
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताऽभ्युपाययौ ॥ १८ ॥
यज्ञवाराहमतुलं रूपं या बिभ्रती हरेः ॥
शक्तिः साऽप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥ १९ ॥
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ॥
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥ २० ॥
वज्रहस्ता तथैवेन्द्री गजराजोपरिस्थिता ॥
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥ २१ ॥
ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ॥
हन्यंतामसुराः शीघ्रं मम प्रीत्याह चण्डिकाम् ॥ २२ ॥
ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ॥
चण्डिका शक्तिरत्युग्रा शिवा शतनिनादिनी ॥ २३ ॥
सा चाह धूम्रजटिलमीशानमपराजिता ॥
दूत त्वं गच्छ भगवन्पार्श्वं शुम्भनिशुम्भयोः ॥ २४ ॥
ब्रूहि शुंभं निशुंभं च दानवावतिगर्वितौ ॥
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥ २५ ॥

त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः ॥
यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥ २६ ॥
बलावलेपादथ चेद्भवन्तो युद्धकांक्षिणः ॥
तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ॥ २७ ॥
यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ॥
शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता ॥ २८ ॥
तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः ॥
अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता ॥ २९ ॥
ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ॥
ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥ ३० ॥
साच तान् प्रहितान् बाणाञ्छूलशक्तिपरश्वधान् ॥
चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषुभिः ॥ ३१ ॥
तस्याग्रतस्तथा काली शूलपातविदारितान् ॥
खट्वाङ्गपोथितांश्चारीन्कुर्वती व्यचरत्तदा ॥ ३२ ॥
कमण्डलुजलाक्षेपहतवीर्यान् हतौजसः ॥
ब्रह्माणी चाकरोच्छत्रून्येन येन स्म धावती ॥ ३३ ॥
माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ॥
दैत्याञ्जघान कौमारी तथा शक्त्याऽतिकोपना ॥ ३४ ॥

ऐन्द्री कुलिशपातेन शतशो दैत्यदानवाः ॥
पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥ ३५ ॥
तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ॥
वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥ ३६ ॥
नखैर्विदारितांश्चान्यान् भक्षयन्ती महासुरान् ॥
नारसिंही चचाराजौ नादापूर्णदिगम्बरा ॥ ३७ ॥
चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः ॥
पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ॥ ३८ ॥
इति मातृगणं क्रुद्धं मर्दयंतं महासुरान् ॥
दृष्ट्वाऽभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥ ३९ ॥
पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् ॥
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥ ४० ॥
रक्तबिंदुर्यदा भूमौ पतत्यस्य शरीरतः ॥
समुत्पतति मेदिन्यां तत्प्रमाणो महासुरः ॥ ४१ ॥
युयुधे स गदापाणिरिंद्रशक्त्या महासुरः ॥
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ॥ ४२ ॥
कुलिशेनाहतस्याशु बहु सुस्राव शोणितम् ॥
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥ ४३ ॥

यावंतः पतितास्तस्य शरीराद्रक्तबिन्दवः ॥
तावंतः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥ ४४ ॥
ते चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः ॥
समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ॥ ४५ ॥
पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ॥
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥ ४६ ॥
वैष्णवी समरे चैनं चक्रेणाभिजघान ह ॥
गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ॥ ४७ ॥
वैष्णवीचक्रभिन्नस्य रुधिरस्रावसंभवैः ॥
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥ ४८ ॥
शक्त्या जघान कौमारी वाराही च तथाऽसिना ॥
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ॥ ४९ ॥
स चापि गदया दैत्यः सर्वा एवाहनत् पृथक् ॥
मातृः कोपसमाविष्टो रक्तबीजो महासुरः ॥ ५० ॥
तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ॥
पपात यो वै रक्तौघस्तेनासञ्छतशोसुराः ॥ ५१ ॥
तैश्चासुरासृक्संभूतैरसुरैः सकलं जगत् ॥
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥ ५२ ॥

तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरम् ॥
उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु ॥ ५३ ॥

मच्छस्त्रपातसंभूतान्रक्तबिंदून् महासुरान् ॥
रक्तबिंदोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ॥ ५४ ॥

भक्षयंती चर रणे तदुत्पन्नान्महासुरान् ॥
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥ ५५ ॥

भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यंति चापरे ॥
इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ॥ ५६ ॥

मुखेन काली जगृहे रक्तबीजस्य शोणितम् ॥ ५७ ॥

ततोऽसावाजघानाथ गदया तत्र चण्डिकाम् ॥
न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि ॥ ५८ ॥

तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥
यतस्ततस्तद्वक्त्रेण चामुण्डा संप्रतीच्छति ॥ ५९ ॥

मुखे समुद्गता येऽस्या रक्तपातान् महासुराः ॥
तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ॥६०॥

देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभिः ॥
जघान रक्तबीजं तं चामुण्डा पीतशोणितम् ॥ ६१ ॥

स पपात महीपृष्ठे शस्त्रसंघसमाहतः ॥
निरक्तश्च महीपाल रक्तबीजो महासुरः ॥ ६२ ॥

ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ॥
तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः ॥ ६३ ॥

श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
रक्तबीजवधो नाम अष्टमः ॥ ८ ॥

——×०×——



॥ अथ नवमोऽध्यायः ॥



राजोवाच ॥ १ ॥

विचित्रमिदमाख्यातं भगवन् भवता मम ॥
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥ २ ॥

भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ॥
चकार शुम्भो यत्कर्म निशुम्भश्चातिकोपनः ॥ ३ ॥

ऋषिरुवाच ॥ ४ ॥

चकार कोपमतुलं रक्तबीजे निपातिते ॥
शुंभासुरो निशुंभश्च हतेष्वन्येषु चाहवे ॥ ५ ॥

हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ॥
अभ्यधावन्निशुंभोऽथ मुख्ययासुरसेनया ॥ ६ ॥

तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ॥
संदष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥ ७ ॥

आजगाम महावीर्यः शुंभोऽपि स्वबलैर्वृतः ॥
निहन्तुं चंडिकां कोपात्कृत्वा युद्धं तु मातृभिः ॥ ८ ॥
ततो युद्धमतीवासीद्देव्या शुंभनिशुंभयोः ॥
शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥ ९ ॥
चिच्छेदास्ताञ्छरांस्ताभ्यां चण्डिका स्वशरोत्करैः ॥
ताडयामास चांगेषु शस्त्रौघैरसुरेश्वरौ ॥ १० ॥
निशुंभो निशितं खड्गं चर्म चादाय सुप्रभम् ॥
अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥ ११ ॥
ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम् ॥
निशुंभस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम् ॥ १२ ॥
छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोसुरः ॥
तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ॥ १३ ॥
कोपाध्मातो निशुंभोऽथ शूलं जग्राह दानवः ॥
आयान्तं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ॥ १४ ॥
आविध्याथ गदां सोपि चिक्षेप चण्डिकां प्रति ॥
सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता ॥ १५ ॥
ततः परशुहस्तं तमायान्तं दैत्यपुंगवम् ॥
आहत्य देवी बाणौघैरपातयत भूतले ॥ १६ ॥

तस्मिन्निपतिते भूमौ निशुंभे भीमविक्रमे ॥
भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम् ॥ १७ ॥
स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः ॥
भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः ॥ १८ ॥
तमायान्तं समालोक्य देवी शंखमवादयत् ॥
ज्याशब्दं चापि धनुषश्चकारातीव दुस्सहम् ॥ १९ ॥
पूरयामास ककुभो निजघण्टास्वनेन च ॥
समस्तदैत्यसैन्यानां तेजोवधविधायिनाम् ॥ २० ॥
ततः सिंहो महानादैस्त्याजितेभमहामदैः ॥
पूरयामास गगनं गां तथैव दिशोदश ॥ २१ ॥
ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ॥
कराभ्यां तन्निनादेन प्राक् स्वनास्ते तिरोहिताः ॥ २२ ॥
अट्टाट्टहासमशिवं शिवदूती चकार ह ॥
तैः शब्दैरसुरास्त्रेसुः शुंभः कोपं परं ययौ ॥ २३ ॥
दुरात्मंस्तिष्ठतिष्ठेति व्याजहाराम्बिका यदा ॥
तदा जयेत्यभिहितं देवैराकाशसंस्थितैः ॥ २४ ॥
शुंभेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ॥
आयांती वह्निकूटाभा सा निरस्ता महोल्कया ॥ २५ ॥

सिंहनादेन शुंभस्य व्याप्तं लोकत्रयांतरम् ॥
निर्घातनिःस्वनो घोरो जितवानवनीपते ॥ २६ ॥
शुंभमुक्ताञ्छरान्देवी शुंभस्तत्प्रहिताञ्छरान् ॥
चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः ॥ २७ ॥
ततः सा चण्डिका कुद्धा शूलेनाभिजघान तम् ॥
स तदाभिहतो भूमौ मूर्च्छितो निपपात ह ॥ २८ ॥
ततो निशुंभः संप्राप्य चेतनामात्तकार्मुकः ॥
आजघान शरैर्देवीं कालीं केसरिणं तथा ॥ २९ ॥
पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः ॥
चक्रायुधेन दितिजश्छादयामास चण्डिकाम् ॥ ३० ॥
ततो भगवती क्रुद्धा दुर्गादुर्गार्तिनाशिनी ॥
चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥ ३१ ॥
ततो निशुंभो वेगेन गदामादाय चण्डिकाम् ॥
अभ्यधावत वै हंतुं दैत्यसेनासमावृतः ॥ ३२ ॥
तस्यापतत एवाशु गदां चिच्छेद चण्डिका ॥
खड्गेन शितधारेण स च शूलं समाददे ॥ ३३ ॥
शूलहस्तं समायांतं निशुंभममरार्दनम् ॥
हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका ॥ ३४ ॥

भिन्नस्य तस्य शूलेन हृदयान्निःसृतोपरः ॥
महाबलो महावीर्यस्तिष्ठेतिपुरुषोवदन् ॥ ३५ ॥
तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ॥
शिरश्चिच्छेद खड्गेन ततोसावपतद्भुवि ॥ ३६ ॥
ततः सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् ॥
असुरांस्तांस्तथा काली शिवदूती तथापरान् ॥ ३७ ॥
कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ॥
ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः ॥ ३८ ॥
माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे ॥
वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि ॥ ३९ ॥
खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः ॥
वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे ॥ ४० ॥
केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् ॥
भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ॥ ४१ ॥

श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
निशुंभवधो नाम नवमः ॥ ९ ॥

—(×:०:×)—

॥ अथ दशमोऽध्यायः ॥



ऋषिरुवाच ॥ १ ॥

निशुंभं निहतं दृष्ट्वा भ्रातरं प्राणसंमितम् ॥
हन्यमानं बलं चैव शुंभः क्रुद्धोऽब्रवीद्वचः ॥ २ ॥
बलावलेपदुष्टे त्वं मा दुर्गे गर्वमावह ॥
अन्यासा बलमाश्रित्य युद्ध्यसे चातिमानिनी ॥ ३ ॥

देव्युवाच ॥ ४ ॥

एकैवाहं जगत्यत्र द्वितीया का ममापरा ॥
पश्यैता दुष्टमय्येव विशन्त्यो मद्विभूतयः ॥ ५ ॥
ततः समस्तास्ता देव्या ब्रह्माणीप्रमुखालयम् ॥
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदांबिका ॥ ६ ॥

देव्युवाच ॥ ७ ॥

अहं विभूत्या बहुभिरिहरूपैर्यदा स्थिता ॥
तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥ ८ ॥

ऋषिरुवाच ॥ ९ ॥

ततः प्रववृते युद्धं देव्याः शुंभस्य चोभयोः ॥
पश्यतां सर्वदेवानामसुराणां च दारुणम् ॥ १० ॥
शरवर्षैः शतैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ॥
तयोर्युद्धमभूद्भूयः सर्वलोकभयंकरम् ॥ ११ ॥
दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ॥
बभंज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ॥ १२ ॥
मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ॥
बभंज लीलयैवोग्रहुंकारोच्चारणादिभिः ॥ १३ ॥
ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ॥
सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥ १४ ॥
छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ॥
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥ १५ ॥
ततः खड्गमुपादाय शतचन्द्रं च भानुमत् ॥
अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः ॥ १६ ॥
तस्यापतत एवाशु खड्गं चिच्छेद चंडिका ॥
धनुर्मुक्तैः शितैर्बाणैश्चर्मचार्ककरामलम् ॥ १७ ॥
(अश्वांश्च पातयामास रथं सारथिना सह ॥)


हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः ॥
जग्राह मुद्गरं घोरमंबिकानिधनोद्यतः ॥ १८ ॥
चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ॥
तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् ॥ १९ ॥
समुष्टिं पातयामास हृदये दैत्यपुंगवः ॥
देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् ॥ २० ॥
तलप्रहाराभिहतो निपपात महीतले ॥
स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥ २१ ॥
उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ॥
तत्रापि सा निराधारा युयुधे तेन चण्डिका ॥ २२ ॥
नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ॥
चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम् ॥ २३ ॥
ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिकासह ॥
उत्पाट्य भ्रामयामास चिक्षेप धरणीतले ॥ २४ ॥
स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगवान् ॥
अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया ॥ २५ ॥
तमायांतं ततो देवी सर्वदैत्यजनेश्वरम् ॥
जगत्यां पातयामास भित्वा शूलेन वक्षसि ॥ २६ ॥

स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः ॥
चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् ॥ २७ ॥
ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि ॥
जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः ॥ २८ ॥
उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ॥
सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते ॥ २९ ॥
ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ॥
बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः ॥ ३० ॥
अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ॥
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥ ३१ ॥
जज्वलुश्चाग्नयः शांताश्शांता दिग्जनितस्वनाः ॥ ३२ ॥

श्री मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवी-माहात्म्ये शुंभवधो नाम दशमोऽध्यायः ॥ १० ॥

—(×:०:×)—

॥ अथ एकादशोऽध्यायः ॥



ऋषिरुवाच ॥ १ ॥

देव्या हते तत्र महासुरेन्द्रे सेन्द्राः
सुरा वह्निपुरोगमास्तातम् ॥
कात्यायनीं तुष्टुवुरिष्टलाभाद्विकासि-
वक्त्राब्जविकासिताशाः ॥ २ ॥

देवि प्रपन्नार्तिहरे प्रसीद
प्रसीद मातर्जगतोऽखिलस्य ॥
प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य ॥ ३ ॥

आधारभूता जगतस्त्वमेका
महीस्वरूपेण यतः स्थितासि ॥
अपां स्वरूपस्थितया त्वयैत-
दाप्यायते कृत्स्नमलङ्घ्यवीर्ये ॥ ४ ॥

त्वं वैष्णवी शक्तिरनन्तवीर्या
विश्वस्य बीजं परमासि माया ॥
संमोहितं देवि समस्तमेतत्त्वं
वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ५ ॥
विद्याः समस्तास्तव देवि भेदाः
स्त्रियः समस्ताः सकला जगत्सु ॥
त्वयैकया पूरितमम्बयैतत्का
ते स्तुतिः स्तव्यपरापरोक्तिः ॥ ६ ॥
सर्वभूत यदा देवी भुक्तिमुक्तिप्रदायिनी ॥
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥ ७ ॥
सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ॥
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥ ८ ॥
कलाकाष्ठादिरूपेण परिणामप्रदायिनि ॥
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥ ९ ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ॥
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ १० ॥
सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ॥
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥ ११ ॥

शरणागतदानार्तपरित्राणपरायण ॥
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥ १२ ॥
हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ॥
कौशाम्भः क्षरिके देवि नारायणि नमोऽस्तु ते ॥ १३ ॥
त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ॥
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते ॥ १४ ॥
मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ॥
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥ १५ ॥
शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे ॥
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥ १६ ॥
गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे ॥
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥
नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे ॥
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ॥ १८ ॥
किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ॥
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ॥ १९ ॥
शिवदूतीस्वरूपेण हतदैत्यमहाबले ॥
घोररूपे महारावे नारायणि नमोऽस्तु ते ॥ २० ॥

दंष्ट्राकरालवदने शिरोमालाविभूषणे ॥
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥ २१ ॥
लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे ॥
महारात्रि महामाये नारायणि नमोऽस्तु ते ॥ २२ ॥
मेधे सरस्वति वरे भूति बाभ्रवि तामसि ॥
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ॥ २३ ॥
सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥ २४ ॥
एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ॥
पातु नः सर्वभूतेभ्यः कात्यायनि नमोऽस्तु ते ॥ २५ ॥
ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ॥
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥ २६ ॥
हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥
सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव ॥ २७ ॥
असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः ॥
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥ २८ ॥
रोगानशेषानपहंसि तुष्टा रुष्टा
तु कामान् सकलानभीष्टान् ॥

त्वामाश्रितानां न विपन्नराणां
त्वमाश्रिता ह्याश्रयतां प्रयान्ति ॥ २९ ॥
एतत्कृतं यत्कदनं त्वयाद्य
धर्मद्विषां देवि महासुराणाम् ॥
रूपैरनेकैर्बहुधात्ममूर्तिं
कृत्वाम्बिके तत्प्रकरोति कान्या ॥ ३० ॥
विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु
वाक्येषु च का त्वदन्या ॥
ममत्वगर्तेऽतिमहान्धकारे
विभ्रामयत्येतदतीव विश्वम् ॥ ३१ ॥
रक्षांसि यत्रोग्रविषाश्च नागा
यत्रारयो दस्युबलानि यत्र ॥
दावानलो यत्र तथाब्धिमध्ये तत्र
स्थिता त्वं परिपासि विश्वम् ॥ ३२ ॥
विश्वेश्वरि त्वं परिपासि बिश्वं
विश्वात्मिका धारयसीति विश्वम् ॥
विश्वेशवन्द्या भवती भवन्ति
विश्वाश्रया ये त्वयि भक्तिनम्राः ॥ ३३ ॥

देवि प्रसीद परिपालय नोऽरि-
भीतेर्नित्यं यथासुरवधाद्धुनैव सद्यः ॥
पापानि सर्वजगतां प्रशमं नयाशु
ह्युत्पातपाकजनितांश्च महोपसर्गान् ॥ ३४ ॥
प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ॥
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥ ३५ ॥

देव्युवाच ॥ ३६ ॥

वरदाऽहं सुरगणा वरं यन्मनसेच्छथ ॥
तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥ ३७ ॥

देवा ऊचुः ॥ ३८ ॥

सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥ ३९ ॥

देव्युवाच ॥ ४० ॥

वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे ॥
शुंभो निशुंभश्चैवान्यावुत्पत्स्येते महासुरौ ॥ ४१ ॥
नन्दगोपगृहे जाता यशोदा गर्भसंभवा ॥
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥ ४२ ॥

पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ॥
अवतीर्य हनिष्यामि वैप्रचित्तांश्च दानवान् ॥ ४३ ॥
भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान् ॥
रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः ॥ ४४ ॥
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ॥
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम् ॥ ४५ ॥
भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि ॥
मुनिभिः संस्मृता भूमौ संभविष्याम्ययोनिजा ॥ ४६ ॥
ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् ॥
कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः ॥ ४७ ॥
ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ॥
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥ ४८ ॥
शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ॥
तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥ ४९ ॥
दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति ॥
पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥ ५० ॥
रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ॥
तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः ॥ ५१ ॥

भीमादेवीति विख्यातं तन्मे नाम भविष्यति ॥
यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ॥ ५२ ॥
तदाऽहं भ्रामरं रूपं कृत्वा संख्येयषट्पदम् ॥
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम् ॥ ५३ ॥
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः ॥
इत्थं यदा यदा बाधा दानवोत्था भविष्यति ॥ ५४ ॥
तदा तदाऽवतीर्याहं करिष्याम्यरिसंक्षयम् ॥ ५५ ॥

श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये नारायणीस्तुतिर्नामैकादशोऽध्यायः ॥ ११ ॥



॥ अथ द्वादशोऽध्यायः ॥



देव्युवाच ॥ १ ॥

एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ॥
तस्याहं सकलां बाधां नाशयिष्याम्यसंशयम् ॥ २ ॥
मधुकैटभनाशं च महिषासुरघातनम् ॥
कीर्तयिष्यन्ति ये तद्वद्वधं शुंभनिशुंभयोः ॥ ३ ॥
अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः ॥
श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ॥ ४ ॥
न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था न चापदः ॥
भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम् ॥ ५ ॥
शत्रुतो न भयं तस्य दस्युतो वा न राजतः ॥
न शस्त्रानलतोयौघात् कदाचित् संभविष्यति ॥ ६ ॥
तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः ॥
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं हि तत् ॥ ७ ॥

उपसर्गानशेषास्तु महामारीसमुद्भवान् ॥
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥ ८ ॥
यत्रैतत्पठ्यते सम्यङ्नित्यमायतने मम ॥
सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितम् ॥ ९ ॥
बलिप्रदाने पूजायामग्निकार्ये महोत्सवे ॥
सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव वा ॥ १० ॥
जानताऽजानता वापि बलिपूजां तथा कृताम् ॥
प्रतीक्षिष्याम्यहं प्रीत्या वह्निहोमं यथाकृतम् ॥ ११ ॥
शरत्काले महापूजा क्रियते या च वार्षिकी ॥
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥ १२ ॥
सर्वबाधाविनिर्मुक्तो धनधान्यसमन्वितः ॥
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥ १३ ॥
श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः ॥
पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ॥ १४ ॥
रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते ॥
नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वताम् ॥ १५ ॥
शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ॥
ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ १६ ॥

उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः
दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ १७ ॥
बालग्रहाभिभूतानां बालानां शान्तिकारकम् ॥
संघातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥ १८ ॥
दुर्वृत्तानामशेषाणां बलहानिकरं परम् ॥
रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥ १९ ॥
सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम् ॥
पशुपुष्पार्घधूपैश्च गन्धदीपैस्तथोत्तमैः ॥ २० ॥
विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम्
अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥ २१ ॥
प्रीतिर्मे क्रियते सास्मिन्सकृत्सुरिचते श्रुते ॥
श्रुतं हरति पापानि तथारोग्यं प्रयच्छति ॥ २२ ॥
रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम ॥
युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् ॥ २३ ॥
तस्मिञ्च्छ्रुते वैरिकृतं भयं पुंसां न जायते ॥
युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥ २४ ॥
ब्रह्मणा च कृतास्तास्तु प्रयच्छन्ति शुभां मतिम् ॥
अरण्ये प्रान्तरेवापि दावाग्निपरिवारितः ॥ २५ ॥

दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः ॥
सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ॥ २६ ॥
राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बन्धगतोऽपि वा ॥
आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥ २७ ॥
पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे ॥
सर्वबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा ॥ २८ ॥
स्मरन् ममैतच्चरितं नरो मुच्येत संकटात् ॥
मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा ॥ २९ ॥
दूरादेव पलायन्ते स्मरतश्चरितं मम ॥ ३० ॥

ऋषिरुवाच ॥ ३१ ॥

इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा ॥ ३२ ॥
पश्यतामेव देवानां तत्रैवान्तरधीयत ॥
तेऽपि देवा निरातङ्काः स्वाधिकारान्यथा पुरा ॥ ३३ ॥
यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः ॥
दैत्याश्च देव्या निहते शुंभे देवरिपौ युधि ॥ ३४ ॥
जगद्विध्वंसिनि तस्मिन् महोग्रेऽतुलविक्रमे ॥
निशुंभे च महावीर्ये शेषाः पातालमाययुः ॥ ३५ ॥

एवं भगवती देवी सा नित्यापि पुनः पुनः ॥
संभूय कुरुते भूप जगतः परिपालनम् ॥ ३६ ॥
तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते ॥
सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥ ३७ ॥
व्याप्तं तयैतत्सकलं ब्रह्माण्डं मनुजेश्वर ॥
महाकाल्या महाकाले महामारीस्वरूपया ॥ ३८ ॥
सैव काले महामारी सैव सृष्टिर्भवत्यजा ॥
स्थितिं करोति भूतानां सैव काले सनातनी ॥ ३९ ॥
भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ॥
सैवाभावे तथा लक्ष्मीर्विनाशायोपजायते ॥ ४० ॥
स्तुता संपूजिता पुष्पैर्गन्धधूपादिभिस्तथा ॥
ददाति वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभाम् ॥ ४१ ॥

श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवी माहात्म्ये भगवतीवाक्यं नाम द्वादशोऽध्यायः ॥ १२ ॥

—(×:०:×)—

॥ अथ त्रयोदशोऽध्यायः ॥

ऋषिरुवाच ॥ १ ॥

एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमम् ॥ २ ॥
एवंप्रभावा सा देवी ययेदं धार्यते जगत् ॥
विद्या तथैव क्रियते भगवद्विष्णुमायया ॥ ३ ॥
तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ॥
मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे ॥ ४ ॥
तामुपैहि महाराज शरणं परमेश्वरीम् ॥
आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥ ५ ॥

मार्कण्डेय उवाच ॥ ६ ॥

इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ॥
प्रणिपत्य महाभागं तमृषिं संशितव्रतम् ॥ ७ ॥
निर्विण्णोऽतिममत्वेन राज्यापहरणेन च ॥
जगाम सद्यस्तपसे स च वैश्यो महामुने ॥ ८ ॥

संदर्शनार्थमम्बाया । नदीपुलिनसंस्थितः ॥
स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ॥ ९ ॥
तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्तिं महीमयीम् ॥
अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥ १० ॥
निराहारौ यताहारौ तन्मनस्कौ समाहितौ ॥
ददतुस्तौ बलिं चैव निजगात्रास्रगुक्षितम् ॥ ११ ॥
एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥
परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चंडिका ॥ १२ ॥

देव्युवाच ॥ १३ ॥

यत्प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन ॥ १४ ॥
मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि ते ॥ १५ ॥

मार्कण्डेय उवाच ॥ १६ ॥

ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ॥
अत्रैव च निजं राज्यं हतशत्रुबलं बलात् ॥ १७ ॥
सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ॥
ममेत्यहमिति प्राज्ञस्संगविच्युतिकारकम् ॥ १८ ॥

देव्युवाच ॥ १९ ॥

स्वल्पैरहोभिर्नृ पते स्वं राज्यं प्राप्स्यते भवान् ॥ २० ॥

हत्वा रिपूनस्खलितं तव तत्र भविष्यति ॥ २१ ॥
मृतश्च भूयः संप्राप्य जन्म देवाद्विवस्वतः ॥ २२ ॥
सावर्णिको नाम मनुर्भवान्भुवि भविष्यति ॥ २३ ॥
वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवांछितः ॥ २४ ॥
तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ॥ २५ ॥

मार्कण्डेय उवाच ॥ २६ ॥

इति दत्वा तयोर्देवी यथाभिलषितं वरम् ॥
बभूवांतर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥ २७ ॥
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ २८ ॥
पुनरपि ॥ इति दत्त्वा तयो० ॥ एवं देव्या वरं० ॥ २९ ॥
श्री मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
सुरथवैश्ययोर्वरप्रदानं नाम त्रयोदशोऽध्यायः ॥ १३ ॥
एवमादितः ॥ ७०० ॥

—(×:०:×)—

॥ अथ उत्तराङ्गानि ॥



अथोत्तरन्यासाः ॥

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥
शंखिनी चापिनी बाणभुशुंडीपरिघायुधा ॥ हृदयाय नमः ॥
शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ शिरसे स्वाहा ॥
प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ शिखायै वषट् ॥
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ॥
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् ॥ कवचाय हुं ॥
खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ॥
करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः ॥ नेत्रत्रयाय वौषट् ॥
सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥
भयेभ्यस्त्राहि नोदेवि दुर्गे देवि नमोऽस्तु ते ॥ अस्त्राय फट् ॥

अथ ध्यानं ॥

विद्युद्दामसमप्रभां मृगपतिस्कंधस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेवितां ॥
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥ १ ॥

अथ देवीसूक्तम् ॥

तत्रादौ ऋग्वेदोक्तं देवीसूक्तम् ॥

ॐ अहं रुद्रेभिरित्यष्टर्चस्य सूक्तस्य वागांभृणी ऋषिः । श्रीआदिशक्तिर्देवता त्रिष्टुप्छंदः द्वितीया जगती श्री-जगदंबाप्रीत्यर्थं सप्तशतीजपांते जपे विनियोगः ॥

अहंरुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुतविश्वदेवैः ॥
अहंमित्रावरुणोभाबिभर्म्यहमिंद्राग्नीअहमश्विनोभा ॥
अहंसोममाहनसंबिभर्म्यहं त्वष्टारमुत पूषणं भगं ॥
अहंदधामिद्रविणंहविष्मतेसुप्राव्ये ३ यजमानाय सुन्वते ॥
अहं राष्ट्रीसंगमनीवसूनांचिकितुषीप्रथमायज्ञियानां ॥

तांमादेवा व्यदधुःपुरुत्राभूरिस्थात्रांभूर्यावेशयन्तीम् ॥

मयासोअन्नमत्तियो विपश्यतियःप्राणिति यंईशृणोत्युक्तम् ॥

अमंतवोमां तउपक्षियंति श्रुधिश्रुतश्रद्धिवंते वदामि ॥

अहमेवस्वयमिदंवदामिजुष्टं देवेभिरुतमानुषेभिः ॥

यंकामयेतंतमुग्रंकृणोमितंब्रह्माणंतमृषिंतंसुमेधां ॥

अहंरुद्रायधनुरातनोमिब्रह्मद्विषेशरवेहंतवा उ ॥

अहंजनायसमदंकृणोम्यहंद्यावापृथिवी आविवेश ॥

अहंसुवेपितरमस्यमूर्धन्ममयो निरप्स्वं १ तःसमुद्रे ॥

ततोवितिष्ठे भुवनानि विश्वोतामूंद्यां वर्ष्मणोप स्पृशामि ॥

अहमेव वातइव ब्रवाम्यारभमाणाभुवनानिविश्वा ॥

परोदिवापरएनापृथिव्यै तावतीमहिना संबभूव ॥

इति ऋग्वेदोक्तं देवीसूक्तं समाप्तम् ॥

अथ तंत्रोक्तं देवीसूक्तम् ॥

नमो देव्यै महादेव्यै शिवायै सततं नमः ॥
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ १ ॥
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ॥
ज्योत्स्नायै चेंदुरूपिण्यै सुखायै सततं नमः ॥ २ ॥
कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कूम्यै नमो नमः ॥
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥ ३ ॥
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ॥
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ ४ ॥
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ॥
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ ५ ॥
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ६ ॥
या देवी सर्वभूतेषु चेतनेत्यभिधीयते ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ७ ॥
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ८ ॥

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ९ ॥
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १० ॥
या देवी सर्वभूतेषु छायारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ११ ॥
या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १२ ॥
या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १३ ॥
या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १४ ॥
या देवी सर्वभूतेषु जातिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १५ ॥
या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १६ ॥
या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १७ ॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १८ ॥
या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १९ ॥
या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २० ॥
या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २१ ॥
या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २२ ॥
या देवी सर्वभूतेषु दयारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २३ ॥
या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २४ ॥
या देवी सर्वभूतेषु मातृरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २५ ॥
या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २६ ॥

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ॥
भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ॥ २७ ॥
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २८ ॥

स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा
सुरेन्द्रेण दिनेषु सेविता ॥
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥ २९ ॥
या सांप्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते ॥
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्तिभिः ॥ ३० ॥

इति देवीसूक्तं पठित्वा पूर्ववन्नवार्णमंत्रस्य ऋष्यादि-षडंगन्यासपूर्वकमष्टोत्तरशतं जपं कृत्वा तदुत्तरन्यासान्वि-धाय ॥

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धि-र्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥ इतिमन्त्रेण देव्या वामहस्ते जपं निवेदयित्वा रहस्यत्रयं पठेत् ॥

अस्य श्रीसप्तशतीरहस्यत्रयस्य नारायण ऋषिः ॥ अनुष्टुप् छंदः ॥ महाकालीमहालक्ष्मी महासरस्वत्यो देवताः ॥ यथोक्तफलावाप्त्यर्थं जपे विनियोगः ॥

राजोवाच ॥

भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः ॥
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि ॥ १ ॥
आराध्यं यन्मया देव्याः स्वरूपं येन वै द्विज ॥
विधिना ब्रूहि सकलं यथावत्प्रणतस्य मे ॥ २ ॥

ऋषिरुवाच ॥

इदं रहस्यं परममनाख्येयं प्रचक्ष्यते ॥
भक्तोऽसीति न मे किंचित्तवावाच्यं नराधिप ॥ ३ ॥
सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी ॥
लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता ॥ ४ ॥
मातुलिङ्गं गदां खेटं पानपात्रं च बिभ्रती ॥
नागं लिङ्गं च योनिं च बिभ्रती नृप मूर्धनि ॥ ५ ॥
तप्तकांचनवर्णाभा तप्तकांचनभूषणा ॥
शून्यं तदखिलं स्वेन पूरयामास तेजसा ॥ ६ ॥

शून्यं तदखिलं लोकं विलोक्य परमेश्वरी ॥
बभार रूपमपरं तमसा केवलेन हि ॥ ७ ॥
सा भिन्नांजनसंकाशा दंष्ट्रांचितवरानना ॥
विशाललोचना नारी बभूव तनुमध्यमा ॥ ८ ॥
खड्गपात्रशिरःखेटैरलंकृतचतुर्भुजा ॥
कबंधहारं शिरसा बिभ्राणा हि शिरःस्रजम् ॥ ९ ॥
सा प्रोवाच महालक्ष्मीं तामसी प्रमदोत्तमा ॥
नाम कर्म च मे मातर्देहि तुभ्यं नमो नमः ॥ १० ॥
तां प्रोवाच महालक्ष्मीस्तामसीं प्रमदोत्तमाम् ॥
ददामि तव नामानि यानि कर्माणि तानि च ॥ ११ ॥
महामाया महाकाली महामारी क्षुधा तृषा ॥
निद्रा तृष्णा चैकवीरा कालरात्रिर्दुरत्यया ॥ १२ ॥
इमानि तव नामानि प्रतिपाद्यानि कर्मभिः ॥
एभिः कर्माणि ते ज्ञात्वा योऽधीते सोऽश्नुतेसुखम् ॥ १३ ॥
तामित्युक्त्वा महालक्ष्मीः स्वरूपमपरं नृप ॥
सत्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं दधौ ॥ १४ ॥
अक्षमालांकुशधरा वीणापुस्तकधारिणी ॥
सा बभूव वरा नारी नामान्यस्यै च सा ददौ ॥ १५ ॥

महाविद्या महावाणी भारती वाक् सरस्वती ॥
आर्या ब्राह्मी कामधेनुर्वेदगर्भा च धीश्वरी ॥ १६ ॥
अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीम् ॥
युवां जनयतां देव्यौ मिथुने स्वानुरूपतः ॥ १७ ॥
इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयम् ॥
हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ ॥ १८ ॥
ब्रह्मन्विधे विरिंचेति धातरित्याह तं नरम् ॥
श्रीःपद्म कमले लक्ष्मीत्याह माता स्त्रियं च ताम् ॥ १९ ॥
महाकाली भारती च मिथुने सृजतः सह ॥
एतयोरपि रूपाणि नामानि च वदामि ते ॥ २० ॥
नीलकण्ठं रक्तबाहुं श्वेतांगं चंद्रशेखरं ॥
जनयामास पुरुषं महाकाली सितां स्त्रियम् ॥ २१ ॥
स रुद्रः शंकरः स्थाणुः कपर्दी च त्रिलोचनः ॥
त्रयी विद्या कामधेनुः सा स्त्री भाषाक्षरा स्वरा ॥ २२ ॥
सरस्वती स्त्रियं गौरीं कृष्णं च पुरुषं नृप ॥
जनयामास नामानि तयोरपि वदामि ते ॥ २३ ॥
विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः ॥
उमा गौरी सती चंडी सुंदरी सुभगा शुभा ॥ २४ ॥

एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे ॥
चक्षुष्मन्तोऽनुपश्यन्ति नेतरे तद्विदो जनाः ॥ २५ ॥
ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृपत्रयीम् ॥
रुद्राय गौरीं वरदां वासुदेवाय च श्रियम् ॥ २६ ॥
स्वरया सह संभूय विरिंचोऽण्डमजीजनत् ॥
बिभेद भगवान्रुद्रस्तद्वौर्या सहवीर्यवान् ॥ २७ ॥
अण्डमध्ये प्रधानादिकार्यजातमभून्नृप ॥
महाभूतात्मकं सर्वं जगत्स्थावरजंगमम् ॥ २८ ॥
पुपोष पालयामास तल्लक्ष्म्या सह केशवः ॥
संजहार जगत्सर्वं सह गौर्या महेश्वरः ॥ २९ ॥
महालक्ष्मीर्महाराज सर्वसत्त्वमयीश्वरी ॥
निराकारा च साकारा सैव नानाभिधानभृत् ॥ ३० ॥
नामान्तरैर्निरूप्यैषा नाम्ना नान्येन केनचित् ॥ ३१ ॥

इति प्राधानिकं रहस्यं समाप्तम् ॥

ऋषिरुवाच ॥

त्रिगुणा तामसी देवी सात्त्विकी या त्वयोदिता ॥
सा शर्वा चण्डिका दुर्गा भद्रा भगवतीर्यते ॥ १ ॥

योगनिद्रा हरेरुक्ता महाकाली तमोगुणा ॥
मधुकैटभनाशार्थं यां तुष्टावाम्बुजासनः ॥ २ ॥
दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ॥
विशालया राजमाना त्रिंशल्लोचनमालया ॥ ३ ॥
स्फुरद्दशनदंता सा भीमरूपापि भूमिप ॥
रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियाम् ॥ ४ ॥
खड्गबाणगदाशूलशंखचक्रभुशुण्डिभृत् ॥
परिघं कार्मुकं शीर्षं निश्र्योतद्रुधिरं दधौ ॥ ५ ॥
एषा सा वैष्णवी माया महाकाली दुरत्यया ॥
आराधिता वशीकुर्यात्पूजाकर्तुश्चराचरम् ॥ ६ ॥
सर्वदेवशरीरेभ्यो याऽऽविर्भूतामितप्रभा ॥
त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी ॥ ७ ॥
श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला ॥
रक्तमध्या रक्तपादा नीलजंघोरुरुन्मदा ॥ ८ ॥
सुचित्रजघना चित्रमाल्याम्बरविभूषणा ॥
चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी ॥ ९ ॥
अष्टादशभुजापूज्या सा सहस्रभुजा सती ॥
आयुधान्यत्रवक्ष्यन्ते दक्षिणाधः करक्रमात् ॥ १० ॥

अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ॥
चक्रं त्रिशूलं परशुः शंखो घण्टा च पाशकः ॥ ११ ॥
शक्तिर्दण्डश्चर्मचापं पानपात्रं कमण्डलुः ॥
अलंकृतभुजामेभिरायुधैः कमलासनाम् ॥ १२ ॥
सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप ॥
पूजयेत् सर्वलोकानां स देवानां प्रभुर्भवेत् ॥ १३ ॥
गौरीदेहात्समुद्भूता या सत्त्वैकगुणाश्रया ॥
साक्षात्सरस्वती प्रोक्ता शुंभासुरनिबर्हिणी ॥ १४ ॥
दधौ चाष्टभुजा बाणान् मुसलं शूलचक्रभृत् ॥
शंखं घण्टां लांगलं च कार्मुकं वसुधाधिप ॥ १५ ॥
एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ॥
निशुंभमथिनी देवी शुंभासुरनिबर्हिणी ॥ १६ ॥
इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव ॥
उपासनं जगन्मातुः पृथगासां निशामय ॥ १७ ॥
महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती ॥
दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम् ॥ १८ ॥
विरंचिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे ॥
वामे लक्ष्म्या हृषीकेशः पुरतो देवतात्रयम् ॥ १९ ॥

अष्टादशभुजा मध्य वाम चास्या दशानना ॥
दक्षिणेऽष्टभुजा लक्ष्मीर्महतीति समर्चयेत् ॥ २० ॥
पूर्वादिदलतः पूज्या असिताङ्गादिभैरवाः ॥
अष्टादशभुजा चैषा यदा पूज्या नराधिप ॥ २१ ॥
दशानना चाष्टभुजा दक्षिणोत्तरयोस्तदा ॥
दशानना यदा पूज्या दक्षिणोत्तरयोस्तदा ॥ २२ ॥
कालमृत्यू च संपूज्यौ सर्वारिष्टप्रशान्तये ॥
यदा चाष्टभुजा पूज्या शुंभासुरनिबर्हिणी ॥ २३ ॥
नवास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ ॥
नमो देव्या इति स्तोत्रैर्महालक्ष्मीं समर्चयेत् ॥ २४ ॥
अवतारत्रयार्चायां स्तोत्रमन्त्रास्तदाश्रयाः ॥
अष्टादशभुजा चैषा पूज्या महिषमर्दिनी ॥ २५ ॥
महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती ॥
ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी ॥ २६ ॥
महिषान्तकरी येन पूजिता स जगत्प्रभुः ॥
पूजयेज्जगतां धात्रीं चण्डिकां भक्तवत्सलाम् ॥ २७ ॥
अर्घादिभिरलंकारैर्गन्धपुष्पैस्तथोत्तमैः ॥
धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यसमन्वितैः ॥ २८ ॥

रुधिराक्तेन बलिना मांसेन सुरया नृप ॥
बलिमांसादि पूजैयं विप्रवर्ज्या मयेरिता ॥ २९ ॥
तेषां किल सुरामांसैर्नोक्ता पूजा नृप क्वचित् ॥
प्रणामाचमनीयेश्च चन्दनेन सुगन्धिना ॥ ३० ॥
सकर्पूरैश्च ताम्बूलैर्भक्तिभावसमन्वितैः ॥
वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महासुरम् ॥ ३१ ॥
पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया ॥
दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरम् ॥ ३२ ॥
वाहनं पूजयेद्देव्या धृतं येन चराचरम् ॥
ततः कृतांजलिर्भूत्वा स्तुवीत चरितैरिमैः ॥ ३३ ॥
एकेन या मध्यमेन नैकेनेतरयोरिह ॥
चरितार्धं तु न जपेज्जपञ्छिद्रमवाप्नुयात् ॥ ३४ ॥
स्तोत्रमन्त्रैः स्तुवीतेमां यदि वा जगदंबिकाम् ॥
प्रदक्षिणा नमस्कारान् कृत्वा मूर्ध्नि कृतांजलिः ॥ ३५ ॥
क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतन्द्रितः ॥
प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषा ॥ ३६ ॥
जुहुयात्स्तोत्रमन्त्रैर्वा चण्डिकायै शुभं हविः ॥
भूयो नामपदैर्देवीं पूजयेत् सुसमाहितः ॥ ३७ ॥

प्रयतः प्रांजलिः प्रह्वः प्राणानारोप्य चात्मनि ॥
सुचिरं भावयेद्देवीं चण्डिकां तन्मयो भवेत् ॥ ३८ ॥
एवं यः पूजयेद्भक्त्या प्रत्यहं परमेश्वरीम् ॥
भुक्त्वा भोगान् यथाकामं देवीसायुज्यमाप्नुयात् ॥ ३९ ॥
यो न पूजयते नित्यं चण्डिकां भक्तवत्सलाम् ॥
भस्मीकृत्यास्य पुण्यानि निर्दहेत्परमेश्वरी ॥ ४० ॥
तस्मात्पूजय भूपाल सर्वलोकमहेश्वरीम् ॥
यथोक्तेन विधानेन चण्डिकां सुखमाप्स्यसि ॥ ४१ ॥

इति वैकृतिकं रहस्यं समाप्तम् ॥

ऋषिरुवाच ॥

नन्दा भगवतीनाम या भविष्यति नन्दजा ॥
स्तुता संपूजिता भक्त्या वशी कुर्याज्जगत्त्रयम् ॥ १ ॥
कनकोत्तमकान्तिः सा सुकान्तिकनकाम्बरा ॥
देवी कनकवर्णाभा कनकोत्तमभूषणा ॥ २ ॥
कमलाङ्कुशपाशाब्जैरलंकृतचतुर्भुजा ॥
इन्दिरा कमलालक्ष्मीः सा श्रीरुक्मांबुजासना ॥ ३ ॥
या रक्तदन्तिका नाम देवी प्रोक्ता मयाऽनघ ॥
तस्याः स्वरूपं वक्ष्यामि शृणु सर्वभयापहम् ॥ ४ ॥

यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥
रक्ताम्बरा रक्तवर्णा रक्तसर्वांगभूषणा ॥ ५ ॥
रक्तायुधा रक्तनेत्रा रक्तकेशाऽतिभीषणा ॥
रक्ततीक्ष्णनखा रक्तरसना रक्तदन्तिका ॥ ६ ॥
पतिं नारी वाऽनुरक्ता देवी भक्तं भजेज्जनम् ॥
वसुधेव विशाला सा सुमेरुयुगलस्तनी ॥ ७ ॥
दीर्घौ लम्बावतिस्थूलौ तावतीव मनोहरौ ॥
कर्कशावतिकान्तौ तौ सर्वानन्दपयोनिधी ॥ ८ ॥
भक्तान् संपाययेद्देवी सर्वकामदुघौ स्तनौ ॥
खड्गपात्रशिरः खेटैरलंकृतचतुर्भुजा ॥ ९ ॥
आख्याता रक्तचामुण्डा देवी योगेश्वरीति च ॥
अनया व्याप्तमखिलं जगत्स्थावरजंगमम् ॥ १० ॥
इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरम् ॥
भुक्त्वा भोगान् यथाकामं देवीसायुज्यमाप्नुयात् ॥ ११ ॥
अधीते य इमं नित्यं रक्तदन्त्या वपुः स्तवम् ॥
तं सा परिचरेद्देवी पतिं प्रियमिवांगना ॥ १२ ॥
शाकंभरी नीलवर्णा नीलोत्पलविलोचना ॥
गम्भीरनाभिस्त्रिवलीविभूषिततनूदरी ॥ १३ ॥

सुकर्कशसमोत्तुंगवृत्तपीनघनस्तनी ॥
मुष्टिं शिलीमुखा पूर्णं कमलं कमलालया ॥ १४ ॥
पुष्पपल्लवमूलादिफलाढ्यं शाकसंचयम् ॥
काम्यानन्तरसैर्युक्तंक्षुत्तृण्मृत्युजरापहम् ॥ १५ ॥
कार्मुकं च स्फुरत्कान्ति बिभर्ति परमेश्वरी ॥
शाकंभरी शताक्षी सा सैव दुर्गा प्रकीर्तिता ॥ १६ ॥
उमा गौरी सती चंडी कालिका सा च पार्वती ॥
शाकंभरी स्तुवन् ध्यायन् जपन् संपूजयन्नमन् ॥ १७ ॥
अक्षय्यमश्नुते शीघ्रमन्नपानामृतं फलम् ॥
भीमापि नीलवर्णा सा दंष्ट्रादशनभासुरा ॥ १८ ॥
विशाललोचना नारी वृत्तपीनपयोधरा ॥
चन्द्रहासं च डमरुं शिरःपात्रं च बिभ्रती ॥ १९ ॥
एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता ॥
तेजोमण्डलदुर्धर्षा भ्रामरी चित्रकान्तिभृत् ॥ २० ॥
चित्रभ्रमरसंकाशा महामारीति गीयते ॥
इत्येता मूर्तयो देव्या व्याख्याता वसुधाधिप ॥ २१ ॥
जगन्मातुश्चण्डिकायाः कीर्तिताः कामधेनवः ॥
इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया ॥ २२ ॥

आख्यानं दिव्यमूर्तीनामधीष्वावहितः स्वयम् ॥
एतस्यास्त्वं प्रसादेन सर्वमान्यो भविष्यसि ॥ २३ ॥
सप्तजन्मार्जितैर्घोरैर्ब्रह्महत्यासमैरपि ॥
पाठमात्रेण मंत्राणां मुच्यते सर्वकिल्विषैः ॥ २४ ॥
देव्या ध्यानं मया ख्यातं गुह्याद्गुह्यतरं महत् ॥
सर्वरूपमयी देवी सर्वं देवीमयं जगत् ॥ २५ ॥
ततोऽहं विश्वरूपां त्वां नमामि परमेश्वरीम् ॥ २६ ॥

इति मूर्ति रहस्यं समाप्तम् ॥


—(×:०:×)—

अपराधशतं कृत्वा जगदंबेति चोच्चरेत् ॥
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥
सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदंबिके ॥
इदानीमनुकंप्योऽहं यथेच्छसि तथा कुरु ॥
अज्ञानाद्विस्मृतेर्भ्रांत्या यन्न्यूनमधिकं कृतम् ॥
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥
कामेश्वरि जगन्मातः सच्चिदानंदविग्रहे ॥
गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥
सर्वरूपमयी देवी सर्वं देवीमयं जगत् ॥
अतोऽहं विश्वरूपां त्वां नमामि परमेश्वरीम् ॥
गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ॥
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरी ॥

इति मंत्रेण देव्या दक्षिणकरे जपं समर्प्य यथासुखं विहरेदिति ॥

श्रीजगदंबा प्रसन्ना भवतु ॥

इत्युत्तरविधिः समाप्तः ।



॥ नवचंडीशतचंडीसहस्रचंडी-होमप्रयोगः ॥

॥ अथ सप्तशतीहोमप्रयोगः ॥

॥ श्रीगणेशाय नमः ॥

यजमानः शुभदिने सपत्नीकस्तिलतैलेन कृताभ्यंगः स्नात्वा सपूर्णकलशहस्तो मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्योपविश्य देशकालौ स्मृत्वा ममेहजन्मनि दुर्गाप्रीतिद्वारा सर्वापच्छांतिपूर्वकदीर्घायुर्विपुलधनधान्यपुत्रपौत्राद्यनवच्छिन्नसंततिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थं ममामुककार्यसिद्ध्यर्थं वा सनवग्रहमखां नवचंडीं शतचंडीं सहस्रचंडीं (वा ब्राह्मणद्वारा) करिष्ये ॥ तदंगतया गणेशपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धमाचार्यादिवरणं च करिष्ये ॥ इति संकल्प्य तानि कृत्वा आचार्यादीन्वृत्वा तान्यथाविभवं वस्त्रादिना संपूज्य प्रार्थयेच्च ॥ (ते च शतचंड्यां दश। सहस्रचंड्यां शतं। केचिदत्र ग्रहजपार्थमेकमृत्विजं वरयंति ॥)

अथाचार्यः आचम्य देशकालौ संकीर्त्य यजमानेन वृतोहमाचार्यकर्म करिष्ये । इति संकल्प्य यदत्रेतिगौरसर्षपान्विकीर्य पंचगव्येन कुशोदकेन वा मंडपं प्रोक्षेत् ॥

॥ भूतशुद्धिः ॥

आपोहिष्ठा मयोभुवस्तानऽऊर्ज्जे दधातन । महेरणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयते हनः ॥ उशतीरिव मातरः तस्माऽअरङ्गमामवो यस्य क्षयाय जिन्वथ । आपोजनयथा च नः ॥

अपवित्रः पवित्रो वा सर्वावस्थांगतोपि वा । यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।

॥ आसनशुद्धिः ॥

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् । इत्युपविश्य अनंतासनाय नमः ॥ विमलासनाय नमः । पद्मासनाय नमः । अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशम् सर्वेषामविरोधेन पूजा कर्म समारभे । इति भूमौ वामपादघातत्रयं कृत्वा यथोपदेशं विस्तरतः संक्षेपेण वा भूतशुद्ध्यादि कृत्वा नवार्ण-

विध्युक्तैकादशन्यासान्कुर्यात् ॥ अथवैकादशमेवैकं न्यासं कुर्यात् ॥ ततो योनिमुद्रां प्रदर्श्य ध्यायेत् ॥

॥ ध्यानम् ॥

श्वेतानना नीलभुजा सुश्वेतस्तनमंडला ॥ रक्तमध्या रक्तपादा नीलजंघोरुरुन्मदा ॥ सुचित्रजघना चित्रमाल्यांबरविभूषणा ॥ चित्रानुलेपना कांतिरूपसौभाग्यशालिनी ॥ अष्टादशभुजा पूज्या सा सहस्रभुजा सती ॥ आयुधान्यत्र वक्ष्यंते दक्षिणाधःकरक्रमात् ॥ अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ॥ चक्रं त्रिशूलं परशुः शंखो घंटा च पाशकः ॥ शक्तिर्दंडश्चर्म चापं पानपात्रं कमंडलुः ॥

ततो वेद्यां सर्वतोभद्रमष्टदलं वा विलिख्य तत्र ब्रह्मादिमंडलदेवताः संस्थाप्य तन्मध्ये महीद्यौरित्यादिमंत्रैः कलशं संस्थाप्य तस्मिन्गंधपुष्पफलसर्वौषधिदूर्वापंचपल्लवसप्तमृत्तिकास्तत्तन्मंत्रेण निक्षिप्य वस्त्रद्वयेनावेष्ट्य तदुपरि पूर्णपात्रं निधाय कलशे वरुणमावाह्य पूजयेत् ॥ ततःकलशदेवताःस्मरेत् ॥

॥ कलशाऽवाहनम् ॥

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तत्रस्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः । कुक्षौ तु

सागराः सर्वे सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ युजुर्वेदः सामवेदो ह्यथर्वणः । अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रितः ॥

॥ कलशप्रार्थना ॥

देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि सदा कुम्भ विधृतो विष्णुना स्वयम् । त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः । शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः । त्वयि तिष्ठन्ति सर्वेपि यतः कामफलप्रदाः । त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥

तथा कलशोपरिस्थपूर्णपात्रेवस्त्रे यंत्र लिखेत् ॥ तद्यथा ॥ मध्ये त्रिकोणं तद्बहिः षट्कोणं तद्बाह्ये वृत्तं तद्बाह्येऽष्टौदलानि तद्बाह्ये चतुर्द्वारं चतुरस्रत्रयमिति । एवं यंत्रं विलिख्य तत्राष्टादशभुजां अष्टभुजां वा सिंहारूढां सौवर्णीं देवीमूर्तिमग्न्युत्तारणप्राणप्रतिष्ठापूर्वकं प्रतिष्ठाप्य पूजयेत् ॥ तद्यथा ॥

स्ववामे कर्पूरादियुतजलपूर्णकलशं संपूज्य—कलशस्यमुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तत्रस्थितो ब्रह्मा मध्ये

मातृगणाः स्मृताः । कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥ गंगे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धो कावेरि जलेस्मिन् सन्निधिं कुरु । इत्यादि पठित्वा कलशमुद्रां प्रदर्श्य दक्षिणतः शंखं पूजयेत् ॥

॥ शंखपूजनम् ॥

शंखं चंद्रार्कदैवत्यं कुक्षौ वरुण देवता । पृष्ठे प्रजापतिश्चैव अग्रे गंगा सरस्वती । त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया । शङ्खे तिष्ठन्ति विप्रेन्द्र तस्माच्छङ्खं प्रपूजयेत । त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे । निर्मितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते । पाञ्चजन्याय विद्महे । पावनाय धीमहि । तन्नः शङ्खःप्रचोदयात् । इति पठित्वा शंखमुद्रां प्रदर्श्य शंखोदकेनात्मानं पूजाद्रव्याणि च प्रोक्षेत् ॥ अपवित्रः पवित्रोवा० ॥ पीठपूजांकुर्यात् ॥

॥ पीठपूजनम् ॥

देवीदक्षिणे गुं गुरुभ्यो नमः ॥ पं परमगुरुभ्योनमः ॥ पं परात्परगुरुभ्योनमः ॥ पं परमेष्ठिगुरुभ्यो नमः ॥ वामे—गं

गणपतये नमः ॥ दुं दुर्गायै नमः ॥ क्षं क्षेत्रपालाय नमः ॥ मध्ये—आधारशक्त्यैनमः ॥ मूलप्रकृत्यै नमः ॥ कालाग्नि-रुद्राय नमः ॥ महामंडूकाय नमः ॥ कूर्माय नमः ॥ वराहाय नमः ॥ अनंताय नमः ॥ भूम्यै नमः ॥ अमृतार्णवाय नमः ॥ रत्नद्वीपाय नमः ॥ हेमगिरये नमः ॥ नंदनोद्यानाय नमः ॥ मणिभूम्यै नमः ॥ रत्नमंडपाय नमः ॥ कल्पतरवे नमः ॥ रत्नसिंहासनाय नमः ॥ आग्नेय्यादिकोणेषु—धर्माय नमः ॥ ज्ञानाय नमः ॥ वैराग्याय नमः ॥ ऐश्वर्याय नमः ॥ अधर्माय नमः ॥ अज्ञानाय नमः ॥ अवैराग्याय नमः ॥ अनैश्वर्याय नमः ॥ ऊर्ध्व—ब्रह्मणे नमः ॥ अधः—अनंताय नमः ॥ मध्ये—वास्तुपुरुषाय नमः ॥ सं सत्वाय नमः ॥ रं रजसे नमः ॥ तं तमसे नमः ॥ मां मायायै नमः ॥ विं विद्यायै नमः ॥

पूर्वाद्यष्टदिक्षु — उड्डाणपीठेश्वरसहितामुड्डाणपीठेश्वर्यंबा-पादुकां पूजयामि ॥ मातृकापीठेश्वरसहितां मातृकापीठेश्वर्यंबा-पादुकां पूजयामि ॥ जालंधरपीठेश्वरसहितां जालंधरपीठेश्वर्यंबा-पादुकां पूजयामि ॥ कोल्हागिरिपीठेश्वरसहितां कोल्हागिरि-पीठेश्वर्यंबापादुकां पूजयामि ॥ पूर्णागिरिपीठेश्वरसहितां पूर्ण-

गिरिपीठेश्वर्यंबापादुकां पूजयामि ॥ संहारगिरिपीठेश्वरसहितां संहारगिरिपीठेश्वर्यंबापादुकां पूजयामि ॥ कोल्हापुरपीठेश्वर-सहितां कोल्हापुरपीठेश्वर्यंबापादुकां पूजयामि ॥ कामरूप-पीठेश्वरसहितां कामरूपपीठेश्वर्यंबापादुकां पूजयामि ॥

पुनः पूर्वादिचतुर्दिक्षु—गं गणेशायनमः ॥ क्षं क्षेत्रपालाय नमः । पां पादुकाभ्यो नमः ॥ बं बटुकेभ्यो नमः ॥ आग्नेय्या-दिविदिक्षु—जं जयायै नमः ॥ विं विजयायै नमः ॥ जं जयंत्यै नमः ॥ अं अपराजितायै नमः ॥ तत्रैव—अग्नि-मुखवेतालाय नमः ॥ प्रेतवाहनवेतालाय नमः ॥ ज्वालामुख-वेतालाय नमः ॥ धूम्राक्षवेतालाय नमः ॥ कंदाय नमः ॥ नालाय नमः ॥ दलेभ्यो नमः ॥ केसरेभ्यो नमः ॥ कर्णि-कायै नमः ॥ अं सूर्यमंडलाय नमः ॥ उं सोममंडलाय नमः ॥ मं वह्निमंडलाय नमः ॥ अं आत्मने नमः ॥ उं अंतरात्मने नमः ॥ पं परमात्मने नमः ॥ उं ज्ञानात्मने नमः ॥ विं विष्णुमायायै नमः ॥ चें चेतनायै नमः ॥ बुं बुद्ध्यै नमः ॥ निं निद्रायै नमः ॥ क्षुं क्षुधायै नमः ॥ छां छायायै नमः ॥ शं शक्त्यै नमः ॥ तृं तृष्णायै नमः ॥ क्षां क्षांत्यै नमः ॥ जां जात्यै नमः ॥ लं ललितायै नमः ॥ शां शांत्यै नमः ॥

श्रं श्रद्धायै नमः ॥ कां कांत्यै नमः ॥ लं लक्ष्म्यै नमः ॥ धृं धृत्यै नमः ॥ वृं वृद्ध्यै नमः ॥ स्मृं स्मृत्यै नमः ॥ दं दयायै नमः ॥ तुं तुष्ट्यै नमः ॥ पुं पुष्ट्यै नमः ॥ मां मातृकायै नमः ॥ भ्रां भ्रांत्यै नमः ॥ ह्रीं सर्वशक्तिकमलासनाय नमः ॥ सर्वात्मसंसर्गयोगपीठात्मने नमः ॥ इति पीठपूजा ॥ तथा स्थापितमूर्तौदेवीमावाहयेत् ॥

॥ आवाहनम् ॥

आगच्छ वरदे देवि दैत्यदर्पनिषूदिनि ॥ पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये ॥ दुर्गेदेवि समागच्छ सान्निध्यमिहकल्पय ॥ बलिं पूजां गृहाणत्वमष्टाभिः शक्तिभिः सह ॥

मूर्तौ मंत्रौ पठित्वा मूर्तौ देवीमावाह्य मूलमंत्रेण जयंतीमंगलाकालीत्यनेन वा आसनपाद्यार्घ्याचमनमधुपर्कान्निवेदयेत् ॥

॥ पंचामृतस्नानं ॥

देवीसूक्तश्रीसूक्तसरस्वतीसूक्तैर्देवीमाहात्म्योक्तैः शक्रादयइत्यादिस्तोत्रैश्चाभिषेकः ॥ ततः पूर्वोक्तमंत्रेण वस्त्रकंचुकाभरणाष्टगंधबिल्वपत्रनानापुष्पहरिद्राकुंकुमसिंदूरालक्तकपरिमलद्रव्याणि समर्पयेत् ॥

॥ अथांगपूजा ॥

ॐ दुर्गायै नमः पादौ । गिरिजायै नमः गुल्फौ । अपर्णायै नमः जानुनी । हरिप्रियायै नमः ऊरू । पार्वत्यै नमः कटिं । आर्यायै नमः नाभिं । जगन्मात्रे नमः उदरं । मंगलायै नमः कुक्षिं ॥ शिवायै नमः हृदयं । माहेश्वर्यै नमः कंठं । विश्ववंद्यायै नमः स्कंधौ । काल्यै नमः बाहू । आद्यायै नमः हस्तौ । वरदायै नमः मुखं । सुवाण्यै नमः नासिकां । कमलाक्ष्यै नमः नेत्रे । अंबिकायै नमः शिरः । देव्यै नमः सर्वांगं ।

अथाष्टोत्तरशतनामानि ॥

ॐ माहेश्वर्यै नमः । महादेव्यै नमः । जयंत्यै नमः । सर्वमंगलायै नमः । लज्जायै नमः । भगवत्यै नमः । वंद्यायै नमः । भवान्यै नमः । पापनाशिन्यै नमः । चंडिकायै नमः । कालरात्र्यै नमः । भद्रकाल्यै नमः । अपराजितायै नमः । महाविद्यायै नमः । महामेधायै नमः । महामायायै नमः । महाबलायै नमः । कात्यायन्यै नमः । जयायै नमः । दुर्गायै नमः । मंदारवनवासिन्यै नमः । आर्यायै नमः ।

गिरिसुतायै नमः । धात्र्यै नमः । महिषासुरघातिन्यै नमः । सिद्धिदायै नमः । बुद्धिदायै नमः । नित्यायै नमः । वरदायै नमः । वरवर्णिन्यै नमः । अंबिकायै नमः । सुखदायै नमः । सौम्यायै नमः । जगन्मात्रे नमः । शिवप्रियायै नमः । भक्तसंतापसंहर्त्र्यै नमः । सर्वकामप्रपूरिण्यै नमः । जगत्कर्त्र्यै नमः । जगद्धात्र्यै नमः । जगत्पालनतत्परायै नमः । अव्यक्तायै नमः । व्यक्तरूपायै नमः । भीमायै नमः । त्रिपुरसुंदर्यै नमः । अपर्णायै नमः । ललितायै नमः । वेद्यायै नमः । पूर्णचंद्रनिभाननायै नमः । चामुंडायै नमः । चतुरायै नमः । चंद्रायै नमः । गुणत्रयविभागिन्यै नमः । हेरंबजनन्यै नमः । काल्यै नमः । त्रिगुणायै नमः । यशोधारिण्यै नमः । उमायै नमः । कलशहस्तायै नमः । दैत्यदर्पनिषूदिन्यै नमः । बुद्ध्यै नमः । कांत्यै नमः । क्षमायै नमः । शांत्यै नमः । पुष्ट्यै नमः । तुष्ट्यै नमः । धृत्यै नमः । मत्यै नमः । वरायुधधरायै नमः । धीरायै नमः । गौर्यै नमः । शाकंभर्यै नमः । शिवायै नमः । अष्टसिद्धिप्रदायै नमः । वामायै नमः । शिववामांगवासिन्यै नमः । धर्मदायै नमः । धनदायै नमः । श्रीदायै नमः । कामदायै नमः ।

मोक्षदायै नमः । अपरायै नमः । चित्स्वरूपायै नमः । चिदानंदायै नमः । जयश्रियै नमः । जयदायिन्यै नमः । सर्वमंगलमांगल्यायै नमः । जगत्त्रयहितैषिण्यै नमः । शर्वाण्यै नमः । पार्वत्यै नमः । धन्यायै नमः । स्कंदमात्रे नमः । अखिलेश्वर्यै नमः । प्रपन्नार्तिहरायै नमः । देव्यै नमः । सुभगायै नमः । कामरूपिण्यै नमः । निराकारायै नमः । साकारायै नमः । महाकाल्यै नमः । सुरेश्वर्यै नमः । शर्वायै नमः । श्रद्धायै नमः । ध्रुवायै नमः । कृत्यायै नमः । मृडान्यै नमः भक्तवत्सलायै नमः । सर्वशक्तिसमायुतायै नमः । शरण्यायै नमः । सर्वकामदायै नमः । इत्यष्टोत्तरशतनामानि ॥

॥ अथावरणपूजा ॥

देव्या दक्षिणे—ऐं महाकाल्यै विच्चे नमः ॥ वामे—ह्रीं महालक्ष्म्यै विच्चे नमः ॥ पुरतः—क्लीं महासरस्वत्यैविच्चे नमः ॥ वामे—ह्रूं महिषाय नमः ॥ दक्षिणे क्ष्रौं सिंहाय नमः ॥ पुरतः—गंगणपतये नमः ॥ ह्रुं कालायनमः ॥ पश्चात् ह्रूं मृत्यवे नमः ॥ षट्दलेषु—ह्रौं रुद्राय नमः ॥ ह्रौं गौर्यै नमः ॥ श्रीं विष्णवे नमः ॥ श्रीं लक्ष्म्यै नमः ॥ ऐं ब्रह्मणे नमः ॥ ऐं सरस्वत्यै नमः ॥ तत्रैव—ह्रां हृदयाय नमः ॥ ह्रीं शिरसे

स्वाहा ॥ ह्रूं शिखायै वषट् ॥ ह्रैं कवचाय हुं ॥ ह्रौं नेत्रत्रयाय वौषट् ॥ ह्रः अस्त्राय फट् ॥ तत्रैव—गुं गुरुभ्यो नमः ॥ पं परम-गुरुभ्यो नमः ॥ पं परमेष्ठीगुरुभ्यो नमः ॥ हरये नमः ॥ हराय-नमः ॥ गणेशाय नमः ॥ तत्रैव—नंदजायै नमः । रक्तदंतिकायै नमः ॥ शाकंभर्यै नमः ॥ दुर्गायै नमः ॥ भीमायै नमः ॥ भ्रामर्यै नमः ॥ अथाष्टदलेषु—ब्राह्म्यै नमः ॥ माहेश्वर्यै नमः ॥ कौमार्यै नमः ॥ वैष्णव्यै नमः ॥ वाराह्यै नमः ॥ इंद्राण्यै नमः ॥ नारसिंह्यै नमः ॥ चामुंडायै नमः ॥ पूर्वादिदिक्षु—अं असितांगभैरवाय नमः । रुं रुरुभैरवाय नमः । चं चंडभैरवाय नमः । क्रों क्रोधभैरवाय नमः । उं उन्मत्तभैरवाय नमः । कं कपालभैरवाय नमः । भीं भीषणभैरवाय नमः । सं संहार-भैरवाय नमः ॥

पुनः पूर्वादिषु—लं इंद्राय नमः ॥ रं अग्नये नमः ॥ मं यमाय नमः ॥ षं निर्ऋतये नमः ॥ वं वरुणाय नमः ॥ यं वायवे नमः ॥ सं सोमाय नमः ॥ हं ईशानाय नमः ॥

तद्बहिः—पूर्वादि वज्राय नमः ॥ शक्त्यै नमः ॥ दंड़ाय नमः ॥ खड्गाय नमः ॥ पाशाय नमः ॥ अंकुशाय नमः ॥ गदायै नमः ॥ त्रिशूलाय नमः ॥ इत्यावरणपूजा ॥

ततः पूर्वोक्तमंत्रेण धूपदीपनैवेद्यादिमंत्रपुष्पांतपूजां कृत्वा नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणतास्मताम् इतिमंत्रैर्नमस्कृत्य यथासंभवं छत्रचामरगीतनृत्यवाद्यादिसमर्प्य कूष्मांडनारिकेलकदलीफलादिबलिं दत्वा ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि। यत्पूजितं मया देवि प्रसीद परमेश्वरि ॥ आवाहनं न जानामि न जानामि विसर्जनम्। पूजां चैव न जानामि प्रसीद परमेश्वरि ॥ अनेन पूजनेन श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यः प्रीयंतां ॥

॥ कुमारीपूजा ॥

देशकालौ संकीर्त्य शतचंडीजपांगत्वेन कुमारीपूजां करिष्ये इतिसंकल्प्य मूलेन षडंगं कृत्वा मूलमंत्रमुच्चार्य ॥ मंत्राक्षरमयीं देवीं मातृणां रूपधारिणीं ॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं ॥ इति कुमारीमावाह्य यथासंभवं पूजयेत् ॥ कुमार्यश्च प्रत्यहं शतं नव एकावा यथाशक्ति वा पूज्या॥ प्रत्यहमेकवृद्ध्या वा पूजयेत् ॥ ततो ब्राह्मणसुवासिनीपूजा ॥ एवं देवीकुमार्यादिपूजा प्रत्यहं कार्या ॥ ततः सर्वे विप्राः कृतांगन्यासाः शतं नवार्णमंत्रं जप्त्वा कवचार्गलकीलकानि सकृज्जप्त्वा सप्तशतीं जप्त्वांते रहस्यादि नवार्णं शतं च जपेत्। एकस्मिन्दि-

ने अनेकावृत्तिषु तु कवचादीनां प्रत्यावृत्ति नावृत्तिः ॥ एवमृत्विजः प्रथमदिने एकं द्वितीये द्वे तृतीये त्रीणि चतुर्थे चत्वारि रूपाणीत्येवं जपं कुर्युः ॥ ऋत्विजां यजमानस्य प्रत्यहं क्षीरमात्राशनं अशक्तौ हविष्याशनं वा । प्रत्यहं सहस्रं शतं दश वा ब्राह्मणान्भोजयेत् । पंचमेह्निहोमः ॥ नवरात्रेतु नवम्यामेव होमः ॥ क्वचित्तु अष्टम्यामारभ्य नवम्यां समापयंति ॥

॥ अथ होमः ॥

देशकालौ स्मृत्वा मया ब्राह्मणद्वारा कृतस्य शतचंडीजपस्य संपूर्णतासिद्ध्यर्थं जपदशांशेन तिलादिमिश्रपायसद्रव्येण होमं करिष्ये इतिसंकल्प्य ॥ अत्र केचित्पुण्याहवाचनमपिकुर्वंति ॥ तथापूर्वोक्तकलशस्थापनं देवतास्थापनं पूजनं चात्रैवकुर्वंति ॥ ततः सनवग्रहशतचंडीजपदशांशहोमं कर्तुं स्थंडिलादिकरिष्ये इतिसंकल्प्य स्थंडिलमुपलिप्योल्लिख्य तत्र (शत)मंगलनामानमग्निं प्रतिष्ठाप्य समिध्य ध्यायेत् ॥ ततः प्रागकृतं चेद्दानीमीशान्यां दिशि नवग्रहस्थापनं कृत्वा तत्पूर्वतः कलशं स्थापयेत् ॥ ततोग्निसमीपमागत्यान्वाधानं कुर्यात् ॥ समिद्वयमादाय क्रियमाणे शतचंडीजपांगहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये ॥ अस्मिन्नन्वाहितेग्नावित्यादिचक्षूषीआज्येनेत्यं-

तमुक्त्वा आदित्यादिनवग्रहान् प्रतिद्रव्यमष्टाविंशतिसंख्याकाभिरष्टाभिर्वा समित्तिलाज्याहुतिभिः अधिदेवताः प्रत्यधिदेवताश्चतुःसंख्याकाभिःतैरेवद्रव्यैः गणपतिचतुष्टयं इंद्राद्यष्टौलोकपालांश्चैकैकयासमित्तिलाज्याहुत्यायक्ष्ये ॥ महाकालीमहालक्ष्मीमहासरस्वतीमूलमंत्रेण शतवारं सप्तशतीमंत्रैः जपदशांशसंख्यया पायसतिलपलाशपुष्पसर्षपपूगीफललाजादूर्वांकुरयवबिल्वफलरक्तचंदनगुग्गुलुद्रव्यैर्यथालाभद्रव्यैर्वा तिलमिश्रपायसेन वा पुनर्मूलमंत्रेण शतवारं तैरेव द्रव्यैः आधारशक्त्यादिपीठदेवताः महाकाल्याद्यावरणदेवताश्चैकैकाहुत्यापायसाज्येनयक्ष्ये शेषेण स्विष्टकृतमित्याद्याज्यभागांतं कृत्वा ॥ यजमानः इदं हवनीयद्रव्यं यथादैवतमस्तु नमम इति त्यजेत् ॥ नवग्रहादिभ्यः समित्तिलाज्यानिहुत्वा उक्तद्रव्याणि मूलमंत्रेण शतवारं हुत्वा सप्तशतीमंत्रैर्जपदशांशेन हुत्वा पुनर्मूलमंत्रेण शतवारं जुहुयात् ॥ मूलमंत्रोनवार्णमंत्रः ॥ नवार्णमंत्रस्यकेवलाज्येनैववाहोमः ॥ अत्राध्यायसमाप्तौउवाचस्थलेचपत्रपुष्पफलैर्होमः ॥

एवं प्रधानहोमं कृत्वा पीठदेवताभ्यो नामभिराज्यं पायसं च जुहुयात् ॥ आधारशक्त्यै नमः । मूलप्रकृत्यै नमः । कालाग्निरुद्राय नमः । महामंडूकाय नमः । कूर्माय नमः ।

वराहाय नमः । अनंताय नमः । भूम्यै नमः । अमृतार्णवाय नमः । रत्नद्वीपाय नमः । हेमगिरये नमः । नंदनोद्यानाय नमः । मणिभूम्यै नमः । रत्नमंडपाय नमः । कल्पतरवे नमः । रत्नसिंहासनाय नमः । धर्माय नमः । ज्ञानाय नमः । वैराग्याय नमः । ऐश्वर्याय नमः । अधर्माय नमः । अज्ञानाय नमः । अवैराग्याय नमः । अनैश्वर्याय नमः । ब्रह्मणे नमः । अनंताय नमः । वास्तुपुरुषाय नमः । सं सत्वाय नमः । रं रजसे नमः । तं तमसे नमः । मां मायायै नमः । विं विद्यायै नमः । उड्डाणपीठेश्वरसहितोड्डाणपीठेश्वर्यंबायै नमः । मातृकापीठेश्वरसहितमातृकापीठेश्वर्यंबायै नमः । जालंधरपीठेश्वरसहितजालंधरपीठेश्वर्यंबायै नमः । कोल्हागिरिपीठेश्वरसहितकोल्हागिरिपीठेश्वर्यंबायै नमः । पूर्णगिरिपीठेश्वरसहितपूर्णगिरिपीठेश्वर्यंबायै नमः । संहारगिरिपीठेश्वरसहितसंहारगिरिपीठेश्वर्यंबायै नमः । कोल्हापुरपीठेश्वरसहितकोल्हापुरपीठेश्वर्यंबायै नमः । कामरूपपीठेश्वरसहितकामरूपपीठेश्वर्यंबायै नमः । गं गणेशाय नमः । क्षं क्षेत्रपालाय नमः । पां पादुकाभ्यो नमः । बं बटुकेभ्यो नमः । जं जयायै नमः । विं विजयायै नमः । जं जयंत्यै नमः । अं अपराजितायै नमः । अग्निमुखवेतालाय नमः । प्रेतवाहन-

वेतालाय नमः । ज्वालामुखवेतालाय नमः । धूम्राक्षवेतालाय नमः । कंदाय नमः । नालाय नमः । दलेभ्यो नमः । केसरेभ्यो नमः । कर्णिकायै नमः । अं सूर्यमंडलाय नमः । उं सोममंडलाय नमः । मं वह्निमंडलाय नमः । अं आत्मने नमः । उं अंतरात्मने नमः । पं परात्मने नमः । उं ज्ञानात्मने नमः । विं विष्णुमायायै नमः । चें चेतनायै नमः । बुं बुद्ध्यै नमः । निं निद्रायै नमः । क्षुं क्षुधायै नमः । छां छायायै नमः । शं शक्त्यै नमः । तृं तृष्णायै नमः । क्षां क्षांत्यै नमः । जां जात्यै नमः । लं ललितायै नमः । शां शांत्यै नमः । श्रं श्रद्धायै नमः । कां कांत्यै नमः । लं लक्ष्म्यै नमः । धृं धृत्यै नमः । वृं वृद्ध्यै नमः । स्तृं स्मृत्यै नमः । दें ददायै नमः । तुं तुष्ट्यै नमः । पुं पुष्ट्यै नमः । मां मातृकायै नमः । भ्रां भ्रांत्यै नमः । ह्रीं सर्वशक्तिकमलासनाय नमः । सर्वात्मसंसर्गयोगपीठात्मने नमः । इति पीठदेवताहोमः ।

॥ अथावरणदेवताः ॥

ऐं महाकाल्यैविच्चे । ह्रीं महालक्ष्म्यैविच्चे । क्लीं महासरस्वत्यैविच्चे । हूं महिषाय नमः । क्षं सिंहाय नमः । गं गणपतये

नमः । ह्रूं कालाय नमः । ह्रूं मृत्यवे नमः । ह्रौं रुद्राय नमः । ह्रौं गौर्यै नमः । श्रीं विष्णवे नमः । श्रीं लक्ष्म्यै नमः । ऐं ब्रह्मणे नमः । ऐं सरस्वत्यै नमः । ह्रां हृदयाय नमः । ह्रीं शिरसे स्वाहा । ह्रूं शिखायै वषट् । ह्रौं कवचाय हुं । ह्रौं नेत्र-त्रयाय वौषट् । ह्रः अस्त्राय फट् । गुं गुरुभ्यो नमः । पं परम-गुरुभ्यो नमः । पं परमेष्ठिगुरुभ्यो नमः । हरये नमः । हराय नमः । गणेशाय नमः । नंदजायै नमः । रक्त दंतिकायै नमः । शाकंभर्यै नमः । दुर्गायै नमः । भीमायै नमः । भ्रामर्यै नमः । ब्राह्म्यै नमः । माहेश्वर्यै नमः । कौमार्यै नमः । वैष्णव्यै नमः । वाराह्यै नमः । इंद्राण्यै नमः । नारसिंह्यै नमः । चामुंडायै नमः । अं असितांगभैरवाय नमः । रुं रुरुभैरवाय नमः । चं चंडभैरवाय नमः । क्रों क्रोधभैरवाय नमः । उं उन्मत्तभैरवाय नमः । कं कपालभैरवाय नमः । भीं भीषणभैरवाय नमः । संसंहारभैरवाय नमः । लं इंद्रायनमः । रं अग्नये नमः । मं यमाय नमः । क्षं निर्ऋतये नमः । वं वरुणाय नमः । यं वायवे नमः । सं सोमाय नमः । हं ईशानाय नमः । वज्राय नमः । शक्त्यै नमः । दंडाय नमः । खड्गाय नमः । पाशाय नमः । अंकुशाय नमः । गदायै नमः । त्रिशूलाय नमः ॥

एवं होमं कृत्वा स्विष्टकृदादिप्रायश्चित्तहोमांतं कृत्वा इंद्रादिनवग्रहक्षेत्रपालादिभ्यो माषभक्तबलींस्तत्तन्मंत्रैर्दद्यात् ॥ तत्र मंत्राः ॥ इंद्रंवो० इंद्रः सुरपतिश्चैव वज्रहस्तो महाबलः ॥ शतयागाधिपो देवस्तस्मै नित्यं नमोनमः ॥ इंद्राय सांगाय सपरिवाराय सशक्तिकाय सायुधाय इमं सदीपमाषभक्तबलिं समर्पयामि भो इंद्र इमं बलिं भक्ष दिशं रक्ष मम यजमानस्य आयुःकर्ता शांतिकर्ता पुष्टिकर्ता तुष्टिकर्ता कल्याणकर्ता वरदोभव ॥ अनेन बलिदानेन इंद्रः प्रीयतां ॥ १ ॥ अग्निंदूतं । आग्नेयः पुरुषोरक्तः सर्वदेवमयोव्ययः । धूमकेतुरनाधृष्यस्तस्मै नित्यं नमोनमः अग्नये० इत्यादि० ॥ २ ॥ यमाय सोमं० । यमश्चोत्पलपत्राक्षः किरीटीदंडधृक्सदा ॥ लोकसाक्षी विशुद्धात्मा तस्मै नित्यं नमोनमः ॥ यमाय सांगायेत्यादि० ॥ ३ ॥ मोषुणः परापरा० निर्ऋतिस्तु पुमान्कृष्णः सर्वरक्षोधिपोमहान् ॥ खड्गहस्तोमहासत्वस्तस्मै नित्यं० निर्ऋतये सांगायेत्यादि० ॥ ४ ॥ तत्त्वायामि० । वरुणः सर्वलोकेषु पुरुषोनिम्नगाधिपः ॥ पाशहस्तोमहापाबाहुस्तस्मै नित्यं० । वरुणाय सांगायेत्यादि० ॥ ५ ॥ तववाय० सर्वप्राणात्मकोवायुः सर्वजंतुष्ववस्थितः ॥ ध्वजहस्तोमहाप्राण-

स्तस्मैनित्यं० वायवे सांगायेत्यादि० ॥ ६ ॥ सोमोधेनुं० गौरोयस्तु पुमान्सौम्यः सर्वौषधिसमन्वितः ॥ नक्षत्राधिपतिः सोमस्तस्मै नित्यं० सोमाय सांगायेत्यादि० ॥ ७ ॥ तमीशानं० ईशानः पुरुषः शुक्लः सर्वदेवाधिपो महान् ॥ शूलहस्तोविरूपाक्षस्तस्मै नित्यं० ईशानाय सांगायेत्यादि० ॥ ८ ॥ आयंगौः पृश्नि० योसावनंतरूपेण ब्रह्मांडं सचराचरम् ॥ पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं० अनंताय सांगायेत्यादि० ॥ ९ ॥ ब्रह्मजज्ञानं० पद्मयोनिश्चतुर्मूर्तिर्वेदावासः पितामहः ॥ कमंडलुधरोदेवस्तस्मै ० ॥ ब्रह्मणे सांगायेत्यादि ० ॥ १० ॥ नवग्रहेभ्यः सांगेभ्य इत्यादिना ग्रहेभ्यो बलिं दत्वा क्षेत्रपालाय दद्यात् ॥ क्षेत्रस्य पतिना ० सर्वभूताधिपाय क्षेत्राधिपतये शाकिनीडाकिनीभूतप्रेतपिशाचादिपरिवारसहिताय इमं बलिं समर्पयामि ॥ भो क्षेत्रपाल अमुं बलिं भक्ष दिशो रक्ष मम यजमानस्य वा आयुःकर्तेत्यादि ॥ बलिं गृह्णंत्विमे देवा आदित्यावसवस्तथा ॥ मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगाः खगाः ॥ असुरायातुधानाश्च पिशाचोरगराक्षसाः ॥ डाकिन्योयक्षवेतालायोगिन्यः पूतनाः शिवाः ॥ जृंभकाः सिद्धगंधर्वानागाविद्याधरानगाः ॥ दिक्पालालोकपालाश्च ये च विघ्नविनायकाः ॥ जगतां शांतिकर्तारो-

ब्रह्माद्याश्च महर्षयः ॥ मा विघ्नं मा च मे पापं मा संतु परिपंथिनः ॥ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः ॥ इतिमंत्रान्पठेत् ॥ अयं बलिः शूद्रेण दुर्ब्राह्मणेन वा नेयः ॥ ततो हस्तौ पादौ प्रक्षाल्याचम्य पूर्णाहुतिं जुहुयात् ॥ स्रुचिस्रुवेण द्वादशवारमाज्यं गृहीत्वा नारिकेलादि च गृहीत्वा ॥ समुद्रादूर्मि० ३ मूर्धानं० १ पुनस्त्वा० पूर्णादर्वि० सप्ततेअग्ने० धामंतेविश्वं० मूलमंत्रः नमोदेव्यै इत्यादि मंत्राश्च ॥ ततो वसोर्धारां हुत्वा प्रणीताविमोकादि कर्मशेषं समाप्य ॥ मूलमंत्रेण होमदशांशेन दुग्धेन जलेन वा तर्पणं कृत्वा तेनैव मंत्रेण तद्दशांशेन मार्जयेत् ॥ ततो यजमान आचार्यादीन्वस्त्राद्यैः संपूज्य तेभ्यो गोमिथुनानि हिरण्यं च दद्यात् ॥ ततः आचार्यादिभ्योन्येभ्यो वा कपिलागोनीलमणिश्वेताश्वछत्रचामरभूमिशय्यासप्तधान्यानि यथासंभवं वा दद्यात् ॥ तत आचार्यादयः कलशोदकेन सपत्नीकं सकुटुंबं यजमानं समुद्र-ज्येष्ठा-इत्यादिभिः सुरास्त्वेत्यादिभिर्ग्रहमंत्रैश्चाभिषिंचेयुः ॥ ततो यजमानो ग्रहाणामुत्तरपूजां कृत्वाचार्येण विसर्जनेकृते ग्रहपीठदानं कृत्वा देवीं पंचोपचारैः संपूज्य महाबलिंदद्यात् ॥ तत्र क्षत्रियादिनाश्वनेषच्छागमहिषाणामन्यतरोदेयः ॥ विप्रेणतु

कूष्मांडबिल्वमिक्षवश्चदेयाः ॥ सचेत्थं ॥ देवीं द्रोणपुष्पबिल्वाम्रदलजातीचंपकैः संपूज्य कर्ता उदङ्मुखः पूर्वमुखं देवीमुखं वा बलिं गंधादिनाभ्यर्च्य ॥ पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः ॥ प्रणमामि ततः सर्वरूपिणं बलिरूपिणं ॥ चंडिकाप्रीतिदानेन दातुरापद्विनाशनं ॥ चामुंडाबलिरूपाय बले तुभ्यं नमोस्तुते ॥ यज्ञार्थे बलयः सृष्टाः स्वयमेव स्वयंभु वा ॥ अतस्त्वां घातयाम्यद्य तस्माद्यज्ञेवधोऽवधः ॥ इति बलिमभिमंत्र्य ऐं ह्रीं श्रीं इति मंत्रपुष्पं क्षिप्त्वा ॥ रसना त्वं चंडिकायाः सुरलोकप्रसाधकः ॥ ह्रांह्रींखड्ग आंहुंफट् इतिखड्ग मन्यद्वा शस्त्रं संपूज्य ॥ ॐ कालिकालियशेश्वरिलोहदंडायै नमः ॥ इति बलिं छेदयित्वा ॐ ह्रीं ऐं ह्रीं कौशिकि रुधिरेणाप्यायतां इति देव्यै निवेद्य ततो माषपिष्टमयं शत्रुं कृत्वा खड्गेन छेदयित्वा स्कंदाय विशिखाय च दत्वा बलिशेषं रक्षोभ्यो हरेत् ॥ मंत्रस्तु ॐ ह्रीं स्फुरस्फुर कुंभ २ सुनु २ गुलु २ धुनु २ मारय २ विद्रावय २ विदारय २ कंपय २ कंपातय २ पूरय २ ॐ ह्रीं ॐ हुं फट् २ हुं मर्दय २ हुं ॥ ततः शेषं बहिर्दद्यात् ॥ तत्रमंत्राः ॥ बलिं गृह्ण त्विमं देवा इत्यादयःपूर्वोक्ता एव ॥ ततः स्नात्वा तिलकं धृत्वा देवीं प्रार्थयेत् ॥ तत्र मंत्राः ॥ खड्गिनी शू-

लिनी घोरा० १ शूलेन पाहिनोदेवि० ४ नमोदेव्यै महादेव्यै० ६ रूपं देहि यशो देहि भगं भगवति देहि मे ॥ पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे ॥ महिषघ्नि महामाये चामुंडे मुंडमालिनि । आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तुते ॥ इति देवीं संप्रार्थ्य गुह्यातिगुह्यगोप्त्रीत्वं गृहाणास्मत्कृतं जपं ॥ सिद्धिर्भवतु मे देवि-प्रसादात्तव सुन्दरि ॥ इति देव्यैजपं निवेद्य ॥ कृतस्य कर्मणः सांगतासिद्ध्यर्थं कुमारीब्राह्मणसुवासिनीः पूजापूर्वकं संभोज्य संकल्प्य वा न्यूनातिरिक्तदोषपरिहारार्थं ब्राह्मणेभ्यो भूयसी दक्षिणां दत्वाग्निं संपूज्य विभूतिं धृत्वा गच्छगच्छेत्यग्निंविसृज्य मूलमंत्रेण पुष्पेण देवीमुद्वास्य तेनैव षडंगं कृत्वा उत्तिष्ठब्रह्मण० अभ्यार० ॥ उत्तिष्ठ देवि चंडेशि शुभां पूजां प्रगृह्य च ॥ कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ॥ इति मंत्रैर्विसृज्या-चार्याय दत्वा मंत्रं पठेत् ॥ त्रैलोक्यमातर्देवित्वं सर्वभूतद-यान्विते ॥ दानेनानेन संतुष्टा सुप्रीता वरदा भव ॥ ततः यस्य-स्मृत्या० ॥ प्रमादात्कुर्वतांकर्म० इत्यादि जपित्वा कर्मेश्वरार्पणं-कृत्वा सुहृद्युतो भुंजीत ॥

॥ इति नवचंडीशतचंडीसहस्रचंडीहोमप्रयोगः ॥

——:(×):——